इति। ततश्चोत्पलनीलमित्यपि स्यात्। उत्पलपदमपि विशेषणं भवतीति यतः व्याख्यातम्। अत्र न्यासकारः आलोचयति—नैष दोषः, यस्मादेकतरं प्रधानम्, इतरदप्रधानम्। द्वयोः प्राधान्ये परस्परानुपकारित्वादसम्बद्धयोरेकत्र प्रयोगो न स्यात्। अप्राधान्येऽपि द्वयोः प्रधानापेक्षावतोर्नास्ति परस्परोपकारित्वमिति न स्यादेवैकत्र प्रयोगः। तस्मादेकमत्र प्रधानम्, अपरं त्वप्रधानम्। यच्चाप्रधानम्, तदेवोपसर्जनसंज्ञं भवति, नेतरत्, अन्वर्थत्वादुपसर्जनसंज्ञायाः—उप = समीपे विशेष्ये स्वार्थं सृजति = क्षिपतीति। नीलशब्दश्चाप्रधानः, तदर्थस्य गुणस्याप्राधान्यात्; उत्पलशब्दश्च प्रधानः, तदर्थस्य द्रव्यस्य प्राधान्यात्। तस्मान्नीलशब्द एवोपसर्जनम्, नोत्पलशब्द इति न भवति पूर्वोक्तदोषावसरप्रसङ्गः। यत्रोभावपि गुणशब्दौ तत्र पर्यायेणोपसर्जनभावः, यथा—कुब्जखञ्जः, खञ्जकुब्ज इति। अथ कुतोऽत्र द्रव्यस्य प्राधान्यमवसितम् इति जिज्ञासायां न्यासकारस्य युक्तिः एवं प्रसरति—यथा—श्वेतं छागमालभेतेत्यस्यां देशनायां श्वेतगुणस्याभावेऽन्यवर्णस्यापि च्छागस्यालम्भनाच्छागाभावे श्वेतगुणस्यान्यद्रव्यस्यानालम्भनाच्च। न हि च्छागाभावे पिष्टकपिण्डीमालभ्य याज्ञिकः कृती भवति। यदि च प्रधानं गुणः स्यात् तदा यथा छागाभावे पिष्टकपिण्डी नालभ्यते, तथा श्वेतगुणाभावेऽन्यगुणोऽपि च्छागो नालभ्यते। न च स नालभ्यते, तस्माद् द्रव्यमेव प्रधानम्, न गुण इति। ननु चोत्पलशब्दोऽपि नैव द्रव्यशब्दः, जातिनिमित्तत्वात्, तत् कथमस्य प्राधान्यम्? अथ जातिमतो द्रव्यस्याभिधानाज् जातिशब्दोऽपि द्रव्यशब्दोऽयमिति व्यवस्थाप्यते। एवं नीलशब्देऽप्यतिप्रसङ्गः, सोऽपि हि गुणनिमित्तो नीलगुणवद्द्रव्यस्याभिधानाद् द्रव्यशब्दः स्यात्? नैष दोषः। जातिर्हि द्रव्यस्योत्पत्तेः प्रभृत्याविनाशात् स्वाधारं द्रव्यं नैव जहाति। अतो द्रव्यात्मभूतत्वाज्जातेस्तन्निमित्तकः शब्दो द्रव्यशब्दो व्यवस्थाप्यते। गुणाः पुनरपायिनोऽनपायिनो वा सन्तः तस्मिन् द्रव्ये वर्तन्ते निवर्तन्ते च। तस्मान्नैते द्रव्यात्मभूता इति न तन्निमित्तशब्दो द्रव्यशब्दो व्यवस्थाप्यत इति।

न्यासकारः बौद्धः जिनेन्द्रबुद्धिः। तस्य व्याख्या प्राथम्येन सर्वं पदं अन्यपदार्थव्यावृत्तिद्वारेण एव पदार्थबोधं जनयति इति प्रतिपद्यते। परन्तु मैथिलसम्प्रदायस्य नीलोत्पलपदरहस्यव्याख्यानं नैतादृशं दृश्यते। तत्र बालमनोरमाकारेण यद्रूपं कौमुदीवचनतात्पर्यं व्याख्यातवान् तदीदृशमायाति—विशिष्यते अनेनेति विशेषणम्, इतरस्माद् व्यावर्तकम्। व्यावर्त्यं तु विशेष्यं भिन्नत्वेन ज्ञायमानम्। समानाधिकरणेनेत्यधिकृतम्, तदाह-भेदकमिति। समस्यते स तत्पुरुष इत्यर्थः। नीलमुत्पलं नीलोत्पलमिति। नीलपदं तावदुत्पलम् अनीलाद् उत्पलाद् व्यावर्तयतीति विशेषणसमर्पकम्। तस्य उत्पलपदेन विशेष्यसमर्पकेण समासः। प्रथमानिर्दिष्टत्वाद्

विशेषणस्य पूर्वनिपातः भवति। न हि उत्पलपदम् अनुत्पलान्नीलं व्यावर्तयति जातिशब्दः गुणक्रियाशब्दसमभिव्याहारे विशेष्यसमर्पक एव, न तु विशेषणसमर्पकः, स्वभावात्। यथा—नीलोत्पलम्, पाचकब्राह्मण इति। गुणशब्दयोः समभिव्याहारे विशेषणविशेष्यभावस्य न नियमः। यथा—खञ्जकुब्जः कुब्जखञ्ज इति। क्रियाशब्दयोरप्यनियमः। यथा—पाचकपाठकः पाठकपाचक इति। तथा गुणक्रियाशब्दयोरप्यनियमः। यथा—खञ्जपाचकः पाचकखञ्ज इति भाष्ये स्पष्टम्। तथा कैलासाद्रिः, मन्दराद्रिः, अयोध्यानगरी इत्यादौ संज्ञाशब्दा अपि विशेषणसमर्पका एव, स्वभावात्। सामान्यजाति-विशेषजाति-शब्दयोः समभिव्याहारे तु विशेषजातिरेव विशेषणम्, शिंशपावृक्ष इत्यादि ज्ञेयम्।

अत्र तत्त्वबोधिन्यां यदालोचनं लभ्यते तदेतत्—विशेषणविशेष्ययोः ससम्बन्धिकतया अन्यतरोपादानमात्रेणेतराक्षेपसंभवे उभयोरुपादानं स्पष्टार्थमिति कैयटः। एतच्च 'कुत्सितानि कुत्सनैः इत्यत्रापि तुल्यम्। हरदत्तस्त्वाह—समस्यमान-पदद्वय-जन्य-बोधप्रकारकयोर्विशेषणविशेष्यधर्मयोर्यत्र परस्परव्यभिचारस्तत्रैव समासो यथा स्यात्, नान्यत्रेत्येतदर्थमुभयोपादानम्। तथा च नीलोत्पलादौ समासो भवति, न तु 'तक्षकः सर्पः' इत्यादौ। न हि तक्षकत्वं सर्पत्वं व्यभिचरतीति। तन्मन्दम्। कैलासाद्रिः, मन्दराद्रिः, भावपदार्थः, तर्कविद्या, व्याकरणशास्त्रम्, भोजराजः, इत्यादिप्रयोगादावप्यव्यवस्थितः पूर्वनिपातः स्यात्। अत्र समाधातं — जातिशब्दस्य गुणक्रियाशब्दसमभिव्याहारे विशेष्यसमर्पकतैव। तेन नीलोत्पलं पाचकब्राह्मण इति व्यवस्थित एव प्रयोगः। गुणशब्दयोः क्रियाशब्दयोर्गुणक्रियाशब्दयोश्चानियम एव। खञ्जकुब्जः कुब्जखञ्जः। पाचकपाठकः पाठकपाचकः। खञ्जपाचकः पाचकखञ्ज इति। अत्र मूलमुपसर्जनमिति महासंज्ञा। अप्रधानं ह्युपसर्जनम्। गुणक्रिययोश्च द्रव्यं प्रत्यप्राधान्यं स्पष्टमेवेति।

(६) दर्शनसाहित्येऽपि आयाति नीलोत्पलम्। तत् त्वमसि इति महावाक्ये सर्वे जानन्ति, अस्ति विशेषणविशेष्यभावः सम्बन्धः। तथा विशेषणविशेष्यभावः सम्बन्धः अस्ति नीलोत्पलशब्देऽपि। परन्तु तत् त्वमसीति वाक्ये न नीलोत्पलवत् विशेषणविशेष्यभावः सम्बन्धः सङ्गच्छत इति वेदान्तिनः सिद्धान्तः। कथम्? एतदित्थं बोधयितुं शक्यते, यत् पदं कस्यचित् पदस्य कांश्चित् अन्यान् प्रकारविशेषान् व्यावर्तयति तत् विशेषणमुच्यते। तेन यत् पदम् अन्येभ्यः कतिपयेभ्यः प्रकारविशेषेभ्यः व्यावृत्तं भवति, तत् विशेष्यम्। यथा नीलोत्पलम्। नीलपदं उत्पलस्य रक्तश्वेतादिविशेषान् प्रकारान् व्यावर्तयति इति नीलपदं विशेषणम्। उत्पलपदं च रक्तश्वेतादिविशेषेभ्यः प्रकारेभ्यः व्यावर्त्यते इति विशेष्यम्। अतः नीलोत्पलपदयोः अस्ति विशेषणविशेष्यभावः सम्बन्धः। तत् त्वम् असि इति वाक्येऽपि अस्ति विशेषणविशेष्यभावसम्बन्धः। तत्

इति परोक्षत्वादिविशिष्टं चैतन्यम्, एवं त्वम् अपरोक्षत्वादिविशिष्टं चैतन्यम्। परन्तु अत्र विशेषण-विशेष्ययोर्मध्ये विरोधः अस्ति। यदेव परोक्षं तदेव अपरोक्षं भवितुं नार्हति। अतः तत्-पदं त्वं-पदबोध्यम् अपरोक्षत्वादिविशिष्टतां व्यावर्तयति, एवं त्वं-पदं तत्-पदबोध्यं परोक्षत्वादिविशिष्टतां व्यावर्तयति। एवंरूपेण परस्परं विशेषणविशेष्यभावः सम्बन्धः भवति। केवलं च शुद्धचैतन्यं बोधयति। परन्तु नीलोत्पले नीलपदार्थेन सह उत्पलपदार्थस्य विरोधः नास्ति। नीलपदं गुणपदार्थबोधकम्, उत्पलपदं च द्रव्यपदार्थबोधकम्। अतः अनयोः पदार्थयोः सहयोगेन वाक्यार्थबोधे कापि समस्या नास्ति। प्रत्यक्षेणैव वाक्यार्थस्य पुष्टिः भवति। अतः तत् त्वमसि इति वाक्यार्थबोधे (दृष्टान्तरूपेण) नीलोत्पलमपाकृतम्।

इत्थं साहित्ये नीलोत्पलम्, व्याकरणे नीलोत्पलम्, दर्शनशास्त्रे च नीलोत्पलम् स्वरहस्यमस्माकमुरसि स्थापयत् अस्मान् नन्दयति इत्यत्र भवतु विरामः॥

बौद्धाः खलु अपोहवादप्रतिपादने 'नीलोत्पल'-पदमादायैव आलोचयन्ति।

## टिप्पनी

१. *रघुवंश*काव्यस्य ६/६५, १३/५४, १३/५७ संख्यकेषु श्लेकेषु इन्दीवरशब्दस्य उल्लेखः लभ्यते।

२. (क) नितान्तनीलोत्पलपत्रकान्तिभिः
क्वचित्प्रभिन्नाञ्जनराशिसंनिभैः।
क्वचित्सगर्भप्रमदास्तनप्रभैः
समाचितं व्योम घनैः समन्ततः॥ (*ऋतुसंहारम्,* २/२)

(ख) हंसैर्जिता सुललिता गतिरङ्गनानाम्
आम्भोरुहैर्विकसितैर्मुखचन्द्रकान्तिः।
नीलोत्पलैर्मदकलानि विलोकितानि
भ्रूविभ्रमाश्च रुचिरास्तनुभिस्तरङ्गैः॥ (*ऋतुसंहारम्,* ३/१७)

(ग) केशान्नितान्तघननीलविकुञ्चिताग्रान्
आपूरयन्ति वनिता नवमालतीभिः।
कर्णेषु च प्रवरकाञ्चनकुड्मलेषु
नीलोत्पलानि विविधानि निवेशयन्ति॥ (*ऋतुसंहारम्* ३/१९)

(घ) विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
विकसितनवकाशश्वेतवासो वसाना।

कुमुदरुचिरकान्तिः कामिनीवोन्मदेयं
प्रतिदिशतु शरद्वश्चेतसः प्रीतिमग्र्याम्॥ (*ऋतुसंहारम्* ३/२८)

(ङ) प्रफुल्लनीलोत्पलशोभितानि सोन्मादकादम्बविभूषितानि।
प्रसन्नतोयानि सुशीलतानि सरांसि चेतांसि हरन्ति पुंसाम्॥
(*ऋतुसंहारम्* ४/१९)।

## ग्रन्थपञ्जी


*अभिज्ञानशकुन्तल*। ग्रेटिल् टेक्स्ट्.

*काशिकावृत्तिः* (खण्ड २)। न्यासटीकया पदमञ्जरीटीकया च सहिता। सम्पा. श्रीनारायण मिश्रः, रत्ना पब्लिकेशनस् वाराणसी, १९८५

*महाभारत*। ग्रेटिल् टेक्स्ट.

*मेघदूत*। ग्रेटिल् टेक्स्ट.

*रघुवंश*। ग्रेटिल् टेक्स्ट.

*रामायण*। ग्रेटिल् टेक्स्ट.

*वेदान्तसारः* (सदानन्दयतिकृतः)। सम्पा. राकेश शास्त्री। परिमल पब्लिकेशन्स, २००४

*शार्ङ्गधरपद्धतिः* (The Paddhati of Śārṅgadhara)। सम्पा. पिटार पिटारसन् खण्ड १. बम्बे सन्स्क्रिट सीरिज्, XXXVIII, १९८८

*सिद्धान्तकौमुदी* (भाग २)। सम्पा. गिरिधर शर्मा परमेश्वरानन्द शर्मा च। मोतीलाल बनारसीदास, दिल्ली, १९७१.

# नारदपुराणीयशब्दानुशासनतत्त्वपर्यालोचनम्

**सुव्रतमण्डलः**

**शोधसारः–**

अष्टादशमहापुराणेष्वन्यतमं हि *नारदपुराणम्*। महापुराणेऽस्मिन्सरलयैव गिरा छन्दोबद्धेन पद्येन व्याकरणतत्त्वमुपपादितम्। *नारदीयपुराणे* पूर्वभागे बृहदुपाख्याने द्वितीयपादे द्विपञ्चाशत्तमेऽध्याये व्याकरणतत्त्वं सनन्दमुखेन वर्णितमस्ति। तत्रादावेव व्याकरणं वेदस्य मुखमिति वर्णितम्। शब्दानुशामनशास्त्रमिति व्याकरणस्य प्रसिद्धा समाख्या। इह पुराणे व्याकरणस्य शब्दानुशासनशास्त्रस्य वा नैके विषया आलोचिताः। व्याकरणप्रक्रियावर्णनेन सह वैयाकरणदार्शनिकतत्त्वान्यपीहालोचितानि। तेषामेवालोचनमस्मिन्मयोपस्थाप्यते समासतः। पुराणेषु सृष्टितत्त्वानि तथा विविधानि दार्शनिकतत्त्वानि आलोचितानि। *नारदपुराणेऽपि* तथा। यद्यपि शब्दानुशासनतत्त्वप्रतिपादनं न पुराणानां मुख्यविषयस्तथापीह शब्दानुशासनतत्त्वं यथा वर्णितं न तथा अन्येषु पुराणेषु।

**कुञ्चीशब्दाः–**

पुराणम्, वेदाङ्गानि, व्याकरणम्, शब्दानुशासनम्, शक्तिग्रहः, शब्दब्रह्म, वाक्, आख्यातम्, धातुः, पदम्, प्रक्रियांशः इत्यादयः।

**मूलप्रबन्धः–**

**१. उपोद्घातः–**

प्रयेष्वखिलदार्शनिकतत्त्वर्द्धग्रन्थेषु शब्दानुशासनशास्त्रस्योल्लेखः शब्दानुशास्त्रस्य प्रशंसनञ्च दृश्यते। कुत्रचिच्च शब्दानुशासनीयतत्त्वानामपि पर्यालोचनं दृश्यते। न्यायवैशेषिकचञ्चूनामाचार्याणां विश्वनाथमहाभागानां नये शक्तिधीरेव शाब्दबोधे सहकारिणी। शक्तिग्रहोपायानामादिमस्थानं भजते तावच्छब्दानुशासनशस्त्रमित्यङ्गीकृतमाचर्यैरपि। तैर्भणितं तथाहि–

> ‘शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च।
> वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥[1]’ इति।

---

1 *भाषापरिच्छेदे*–शब्दखण्डे

व्याख्यानावसरे अस्य चोक्तं—'धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति। क्वचित्तु सति बाधके त्यज्यते'इति। जयकृष्णतर्कालङ्काराचार्यैरपि शब्दानुशासनीयतत्त्वानां न्यायदिशा बहुधा पर्यालोचनं स्वकृतौ कृतं *सारमञ्जर्याम्*।

मीमांसकैरपि स्वीयग्रन्थेषु शब्दानुशासनतत्त्वानि पर्यालोचितानि। तथाहि श्रुत्यर्थपर्यालोचनवेलायमाख्यातादीनामर्थविषयेऽप्युपस्थापिता मतिस्तैः स्वतन्त्रा। वाचोऽर्थप्रत्यायने च तैरभिहितमभिहितान्वयवादोऽन्विताभिधानवादश्चेति प्रसिद्धं वादद्वयम्।

वेदघ्राणभूतशिक्षायाञ्च शब्दानुशासनशास्त्रं वेदपुरुषस्यास्यत्वेनालोचितम्। परिज्ञाने आस्यं यथा प्रधानसहायकं वेदविज्ञाने तथा व्याकरणम्। फणीन्द्रेण समर्थितं—'प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति।[2] इति।

कविकोकिलैरपि कृतिषु स्वीयासु भूयः कूजितं शब्दानुशासनतत्त्वम्। तास्वन्यतमं महाकविभट्टिरचितं *'भट्टिकाव्यं' 'रावणवधमि'ति* वा महाकाव्यम्। शब्दानुशासनीयतत्त्वमेवाधिक्येनालोचितमाचार्येणास्मिन्। आलङ्कारिकप्रोक्तमहाकाव्य-लक्षणान्यपीह संगच्छन्ते सर्वथा। स्वकृतिविषये उदितमाचार्येण-

> 'दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।
> हस्तामर्ष इवान्धानां भवेद्व्याकरणादृते॥[3]' इति।

एवमेव *'रावणार्जुनीयम्', 'कविरहस्यम्', 'कुमारपालचरितम्'* इत्यादिषु कविकर्मसु व्याकरणतत्त्वं पर्यालोचितम्। *रामायणेऽपि* व्याकरणप्रशस्तिर्दृश्यते। तथाहि सुग्रीवो रामालक्ष्मणयोः परिचयविज्ञानार्थं स्वसचिवं हनुमन्तं प्रेषितवान्। हनुमांश्च कपिरूपं परित्यज्य भिक्षुरूपं धृत्वा तयोः समीपं गतः। हनुमन्मुखादुदन्तजातं श्रुत्वा रामः लक्ष्मणं प्रत्यवदत्-

> 'नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
> बहु व्याहरतानेन न किञ्चिदपशब्दितम्॥[4]' इति।

शब्दानुशासनशास्त्रस्योल्लेखस्तथा तत्र प्रतिपादिततत्तत्त्वनां पर्यालोचनं पुराणेष्वपि दरीदृश्यते। पुराणं नाम 'व्यासादिमुनिप्रणीतवेदार्थवर्णितपञ्चलक्षणान्वितं शास्त्रम्'[5] इति। महापुराणोपुराणभेदाद्द्वैविध्यं पुराणस्य। वैयाकरणसिद्धान्तानाञ्चोपपादनं दृश्यते। तथाहि *मत्स्यपुराणे* वेदवेदाङ्गादीनामाविर्भावविषये निगदितं-

> 'तपश्चचार प्रथममराणां पितामहः।
> आविर्भूतास्ततो वेदाः साङ्गोपाङ्गोपक्रमाः॥[6] इति।

---

2 *महाभाष्यस्य* पस्पशाह्निके
3 *रावणवधमहाकाव्ये*-२२/३३
4 *रामायणे* किष्किन्धाकाण्डे तृतीयसर्गे
5 *शब्दकल्पद्रुमः* इति कोषग्रन्थे
6 *मत्स्यपुराणे* तृतीयाध्याये

वैयाकरणदार्शनिकाः शब्दस्य ब्रह्मरूपत्वमङ्गीकुर्वन्ति। तेषां नये जगत्प्रक्रिया शब्दब्रह्मणो विवर्तभूता। श्रुतिरपि श्रावयति—'वागेव विश्वा भूवनानि जज्ञे'[7] इति। एवं शब्दब्रह्मपरकं वैयाकरणदार्शनिकतत्त्वम्। वादस्यैतादृशस्याधारो यथा वेदस्तथा पुराणमित्यपि वक्तुं शक्यते। तथाहि *भागवतमहापुराणे* निगदितम्-

'अहं सर्वाणि भूतानि भूतात्मा भूतभावनः।
शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू'[8]॥ इति।

अष्टादशमहापुराणेष्वन्यतमं हि *नारदपुराणम्*। व्याकरणप्रक्रियावर्णनेन सह वैयाकरणदार्शनिकतत्त्वान्यपीहालोचितानि। महापुराणेऽस्मिन्सरलयैव गिरा छन्दोबद्धेन पद्येन व्याकरणतत्त्वमुपपादितम्।

## २ *नारदीयपुराणे* व्याकरणतत्त्वानि-

*नारदीयपुराणे* पूर्वभागे बृहदुपाख्याने द्वितीयपादे द्विपञ्चाशत्तमेऽध्याये व्याकरणतत्त्वं सनन्दमुखेन वर्णितमस्ति। तत्रादावेव व्याकरणं वेदस्य मुखमिति वर्णितम्। तथाहि सनन्दन उवाच-

'अथ व्याकरणं वक्ष्ये संक्षेपात्तव नारद।
सिद्धरूपप्रबन्धेन मुखं वेदस्य साम्प्रतम्॥[9]' इति।

ततः क्रमेण पदस्वरूपं प्रतिपादितम्। तत्र सुप्तिङन्तं पदमित्यादिना पदस्वरूपमुल्लिख्यादौ सुपां स्वरूपमालोचितं तथाहि-

'सुप्तिङन्तं पदं विप्र सुपां सप्त विभक्तयः।
स्वौजसः प्रथमा प्रोक्ता सा प्रातिपदिकात्मिका॥
सम्बोधने च लिङ्गादावुक्ते कर्मणि कर्तरि।
अर्थवत्प्रातिपदिकं धातुप्रत्ययवर्जितम्॥'[10] इति।

प्रसङ्गादत्र वक्तुं शक्यते पदस्वरूपप्रत्यायकं पाणिनीयं शास्त्रं हि—'सुप्तिङन्तं पदम्'[11] इति। पाणिनिना सुपामुल्लेखो विहितो न हि प्रथमादिसंज्ञा विहिता। तथाहि 'विभक्तिश्च'[12] इति सूत्रस्यालोचनावसरे भट्टोजिदीक्षितेन वृत्तावुक्तं—'सुप्तिङौ विभक्तिसंज्ञौ स्तः। तत्र सु औ जस् इत्यादीनां त्रिकाणां प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञाः। ताभिरिहापि व्यवहारः'[13]

7 *ऋग्वेदे*
8 *भागवतपुराणे षष्ठास्कन्धे*
9 *नारदपुराणे* - ५२/१
10 *नारदपुराणे* - ५२/२-३
11 *अष्टाध्याय्यां* -१-४-१४
12 *अष्टाध्याय्यां* - १-४-१०४
13 *वैयाकरणसिद्धान्तकौमुद्याम्*

इति। एवं नारदीयेस्मिन्पुराणे प्रथमादिसंज्ञाः दृश्यन्ते। तासामेवोपयोगः पाणिनीये व्याकरणे विहितः इति वक्तुं शक्यते पुराणानां प्राचीनत्वात्। एवं सर्वासां विभक्तीनामालोचनं क्रमेण *नारदपुराणे* दृश्यते। दिङ्मात्रमिहोदाहरणं हि–

'ङ्सोसामश्च षष्ठी स्यात्स्वामिसम्बन्धमुख्यके।
ङ्योस्सुपः सप्तमी तु स्यात्सा चाधिकरणे भवेत्॥'[14] इति।

सुब्विभक्तीनामालोचनादूर्ध्वं पुराणेऽस्मिन् तिङामालोचनं विहितम्। तथाहि तिङ्विभक्तीनां नामग्राहमालोचनं दृश्यते–

'तिप्तसन्तीति प्रथमो मध्यमः सिप्थस्थोत्तमः।
मिब्वस्मसः परस्मै तु पदानां चात्मनेपदम्॥
त आतेऽन्ते प्रथमो मध्यः से आथे ध्वे तथोत्तमः।
ए वहे मह आदेशा ज्ञेया ह्यन्ये लिङादिषु॥[15] इति।

पाणिनीये व्याकरणे तु तिङ्प्रत्ययानां भिन्नथोल्लेखो विहितः। तद्यथा प्रथमपुरुषस्य बहुवचने झि इति प्रत्ययविधानं कृत्वा झस्य स्थानेऽन्तादेशो विहितः। परन्तूभयत्र फलं तु समानभूतमेव।

ततश्च पुरुषादीनां प्रयोगः कदा भवतीत्यप्यालोचितमस्मिन्। तथाहि वर्णितं–

'नाम्नि प्रयुज्यमाने तु प्रथमः पुरुषो भवेत्।
मध्यमो युष्मदि प्रोक्त उत्तमः पुरुषोऽस्मदि॥[16] इति।

किञ्च, तत्र लडादीनां स्वरूपमप्युपर्णितम्। एवं विस्तरशः पदनिर्माणसहायिकानां सुब्विभक्तीनां तिङ्विभक्तीनाञ्च विस्तरशो वर्णनं *नारदीयपुराणे* वर्णितम्। वस्तुतस्तु अपदस्य शास्त्रे प्रयोगः प्रतिषिद्धः। तथाहि श्रूयते प्रसिद्धा भणितिः—'नापदं शास्त्रे प्रयुञ्जीत' इति। सुपां तिङाञ्चालोचनादूर्ध्वमानुषङ्गिकानां प्रकरणानां सन्ध्यादीनामपि वर्णनं *नारदीयपुराणे* दृश्यते। सन्ध्यालोचनवेलायामजादिसन्धिविभागानां सोदाहरणमुपस्थापनं विहितं पुराणेऽस्मिन्।

ततश्च विद्यते तद्धितानां विषये विस्तृततया वर्णनं महापुराणेऽस्मिन्। अपत्याद्यर्थेषु प्रयुक्तानां तद्धितप्रत्ययानां सोदाहरणमालोचनमिह प्राप्यते। दिङ्मात्रमिहोदाहरणं हि–

'तद्धिताश्चापत्यार्थे पाण्डवाः श्रैधरस्तथा।
गार्ग्यो नाडायनात्रेयौ गाङ्गेयः पैतृस्वस्त्रीयः॥'[17] इति।

---

14 *नारदपुराणे* – ५२/८
15 *नारदपुराणे* – ५२/१८–१९
16 *नारदपुराणे* – ५२/२०
17 *नारदपुराणे* – ५२/५१

तद्धितालोचनात्परं दशानां गणानां प्रत्येकेषामादिमधातोः लडादिषु रूपाणि विमृष्टानि। एवं तिङ्न्तपर्यालोचनमपीह दृश्यते। तथाहि भ्वादिगणपर्यालोचनावसरे तत्र निरूपितं-

'भवति बभूव भविता भविष्यति भवत्वभवद्भवेच्चापि।
भूयादभविष्यल्लादावेतानि रूपाणि......'[18] इत्यादिकम्।

न केवलं धातूनां रूपमपि च णिच्-सन्-यङादीनां प्रत्ययानामुपयोगः कस्मिन्नर्थे भवति सोदाहरणं चात्र वर्णितम्। तथाह्युक्तं-

'प्रयोजके भावयति सनीच्छायां बुभूषति।
क्रियासमभिहारे तु पण्डितो बोभूयते मुने॥'[19] इति।

अस्याध्यायस्यान्तिमचरणे तु समासतत्त्वमपि पर्यालोचितं दृश्यते। तथाहि—

'अधिस्त्रीत्यव्ययीभावे यथाशक्ति च कीर्तितम्।
रामाश्रितस्तत्पुरुषे धान्यार्थो यूपदारु च॥'[20] इत्यादिभिः
उदारहणैः समासेन समासतत्त्वमुपस्थापितम्।

**३ उपसंहारः-**

पुराणेषु सृष्टितत्त्वानि तथा विविधानि दार्शनिकतत्त्वानि आलोचितानि। *नारदपुराणे*ऽपि तथा। यद्यपि शब्दानुशासनतत्त्वप्रतिपादनं न पुराणानां मुख्यविषयस्तथापीह शब्दानुशासनतत्त्वं यथा वर्णितं न तथान्येषु पुराणेषु। अत्र 'अथ व्याकरणं वक्ष्ये' इत्यादिना सनन्दनमुखेन व्याकरणतत्त्वमिहालोचितम्। व्याकरणस्य प्रायेण सर्वा एव प्रक्रियाः सोदाहरणमिह वर्णिताः। न केवलं प्रक्रियांशः अपि तु धातोराख्यातस्यच स्वरूपमिहालोचितम्। तथाह्युल्लिखितं-

'फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्॥'[21] इति।

कौण्डभट्टैः स्वकीये *वैयाकरणभूषणसारे* धातोराख्यातस्य च पर्यालोचनावसरे उपर्युक्तस्य श्लोकस्योपस्थापनं विहितम्। *नारदीयपुराणस्य* तु प्राचीनत्वे न कोऽपि सन्दोहावसरः। एवं धात्वाख्यातयोः स्वरूपप्रतिपादनरूपं शब्दानुशासनशास्त्रीयतत्त्वमपीह आलोचितं दृश्यते। किञ्च, अन्तिमतो वक्तव्यं यद्धि पुराणं तु सुहृत्सम्मिततया मनोज्ञमुपदेशं

---

18 *नारदपुराणे* - ५२/७२
19 *नारदपुराणे* - ५२/७१
20 *नारदपुराणे* - ५२/९१
21 *नारदपुराणे* - ५२८८

ददाति। तस्मात् *नारदपुराणे* आलोचितं शब्दानुशासनशास्त्रीयतत्त्वमवश्यमेव मनोग्राहि स्यात्सहृदयहृदयानामिति शिवम्।

## सहायकग्रन्थसूची

१. आचार्य. कं. वे. रामकृष्णामाचार्यः, *भूषणसारतत्त्वप्रकाशिका,* सम्पा. आचार्यः हरेकृष्णशतपथी, राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः, २०१०

२. कुमार, विनय, *नारद पुराण,* डायमंड पाकेट बुक्स, नई दिल्ली, २०१०

३. कौण्डभट्टः *वैयाकरणभूषणसारः,* सम्पा. चन्द्रिकाप्रसादद्विवेदी, चैखम्बासंस्कृतप्रतिष्ठान, दिल्ली, २०१३.

४. पतञ्जलिः, *महाभाष्यम्* पस्पशाह्निकम्, सम्पा. अनु. दण्डिस्वामिदामोदराश्रमः, आद्यापीठम्, कलकाता, १४१७ [बङ्गाब्दः]. (चतुर्थप्रकाशः)

५. पतञ्जलिः, *महाभाष्यम्* पस्पराह्निकम्. सम्पा. संघमित्रासेनगुप्तः (दासगुप्तः), कल्याणी दासगुप्त, कलकाता, १४१७ [बङ्गाब्दः].(तृतीयसंस्करणम्)

६. Hazra, Ranejdra Chandra, ***Studies in the Puranic Records on Hindu Rites and Customs,*** Motilal Banarasidas, Delhi, 1987 (Reprint).

७. अन्तर्जालसूत्रम् -https://en.wikipedia.org/wiki/Naradiya_Purana

# नञर्थघटिताद्वैतवेदान्तसिद्धान्तविमर्शः

## विवेक-कर्मकारः

भारतीयास्तिकदर्शनेषु वेदान्तापराह्वम् उत्तरमीमांसादर्शनम् अन्यतमम्। उपनिषद्वाक्यार्थविचारे वैमत्यवीक्षणात् वेदान्तदर्शनेऽपि बहवो मार्गाः अद्वैत-विशिष्टाद्वैत-द्वैत-द्वैताद्वैत-शुद्धाद्वैतादयः समुद्भूताः। एतेषु तात्पर्यनिर्णायकलिङ्गैः उपनिषदां नित्यब्रह्ममात्रे तात्पर्यम् अङ्गीकुर्वत् जगान्मिथ्यात्वं च प्रतिपादयच्छङ्कराचार्यैरुपबृंहितम् अद्वैतवेदान्तदर्शनं इतरवेदान्तदर्शनानि अभिभूय विराजतेतराम्। अद्वैतवेदान्तदर्शनस्य सिद्धान्ताः उपनिषद्-गीता-ब्रह्मसूत्रेषु श्रुतिस्मृतिन्यायाख्यप्रस्थानत्रयेषु समुपनिबद्धाः, उत्तरकालीनभाष्यटीकाप्रकरणग्रन्थादिभिः सोपपत्ति प्रपञ्चिताश्च। अद्वैतवेदान्तसिद्धान्तसारः श्लोकार्धेन प्रपञ्चितः शङ्करभगवत्पादैरिति सम्प्रदायवचनम्। स च श्लोकः-

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।। इति। ब्रह्मसत्यत्व-जगन्मिथ्यात्वादयः अद्वैतदर्शनभित्तिभूत-सिद्धान्ता नञर्थघटिता एव। अतः अद्वैतवेदान्तशास्त्रे नञर्थविचारः, नञर्थेषु च कतमस्य तत्तत्प्रसङ्गे ग्राह्यत्वमिति प्रस्तुतमाचार्यैः। प्रबन्धेऽस्मिन् मुख्यतया नञर्थघटिते अद्वैतवेदान्तसिद्धान्ते नञर्थविचारः कथं प्रस्तुतः इति आलोचयिष्यते। प्रबन्धादौ किं तावत् नञ् इति, नञः के अर्थाः इति सक्षेपेण आलोचयिष्यते। ततोऽद्वैतपदविचारे नञः अत्यन्ताभावपक्षं समर्थ्य ब्रह्मस्वरूपविचारे मिथ्यात्वलक्षणविचारे अविद्यालक्षणविचारे च नञर्थो निर्णेष्यते।

### १ नञर्थविचारः

नञ् इति निपातः। नञः अद्रव्यार्थत्वात् चादिगणे च पाठात् ''चादयोऽसत्त्वे'' (*अष्टाध्यायी* १.४.५७) इति सूत्रेण निपातसंज्ञा सिध्यति। निपातत्वात् च ''स्वरादिनिपातमव्ययम्'' (*अष्टाध्यायी* १.१.३७) इति सूत्रेणास्य अव्ययसंज्ञापि सिध्यति। नञः के अर्थाः स्युरिति विषये विस्तृतालोचना न्यायव्याकरणमीमांसाग्रन्थेषु दरीदृश्यते। नञर्थमाधारीकृत्य *नञ्वादः* इति रघुनाथशिरोमणिकृतग्रन्थ एव समुपलभ्यते। नञः अर्थविषये कारिकैषा सुप्रसिद्धा-

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।

अप्राशास्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥ इति।[1] तत्रानिक्षुः शर इत्यादौ नञर्थः सादृश्यम्, भूतले घटो नास्तीत्यादौ अत्यन्ताभावः,अघटः पट इत्यादौ अन्यत्वम्, अनुदरी कन्या इत्यादौ स्वल्पत्वम्, अब्राह्मणो वार्धुषिक इत्यादौ अपकृष्टत्वम्, असुरो दैत्य इत्यादौ च विरोधः इति। *मेदिनीकोशेऽपि* अनुरूपैका कारिका समुपलभ्यते-

नञभावे निषेधे च स्वरूपार्थेऽप्यतिक्रमे।

ईषदर्थे च सादृश्ये तद्विरुद्धतदन्ययोः॥ (अव्ययवर्गः १६) इति।

निरूक्ते यास्काचार्येण नेति निपातस्य अर्थप्रतिपादनकाले प्रथमाध्यायस्य द्वितीयपादे उक्तम्—''नेति प्रतिषेधार्थीयो भाषायाम्'' इति। एतद्वाक्यार्थप्रतिपादनकाले निरुक्तविवृतौ उच्यते—''प्रतिषेधो निषेध इत्यनर्थान्तरम्। सोऽर्थो यस्य स प्रतिषेधार्थः, स एव प्रतिषेधार्थीयः 'गहादित्वात्' स्वार्थे छस्येयादेशः। यथा घटो नास्ति पटो नास्तीति। नशब्दोऽत्रास्तित्वं प्रतिषेधति''[2] इति। संसर्गाभावः अन्योन्याभावश्च नञर्थः, तद्व्यतिरिक्तसादृश्याद्यर्थेषु नञ्पदस्य वृत्तिर्लक्षणया बोध्या इति रघुनाथशिरोमणेरभिमतम्।

शाबरभाष्ये तु अत्यन्ताभावे एव नञः शक्तिः, अन्योन्याभावादौ तु लक्षणा इत्युच्यते। तन्मतमनुसरन् आपदेवोऽपि मीमांसान्यायप्रकाशे अत्यन्ताभावे एव नञः शक्तिमगादीत्।''ननु तदन्यतद्विरुद्धतदभावेषु नञिति स्मरणे नञः स्वसंसृष्टाभाव एव शक्तिः, लाघवात्, न तु तदन्यतद्विरुद्धयोः। तयोरभावघटितत्वेन गौरवात्, अनेकार्थस्य चान्याय्यत्वात् इति पूर्वपक्षस्योत्तरदानप्रसङ्गे स्पष्टमुद्घोष्यते तेन यत्—''सत्यम्। नञोऽभाव एव शक्तिः''[3] इति। तदन्यत्वरूपार्थे नञः शक्त्यनङ्गीकारात् पारिशेष्यात् अभावश्चात्रात्यन्ताभाव इति वचनं नापेक्षते।

नञा च विधीयमानः प्रतिषेधो द्विविधः—प्रसज्यप्रतिषेधः पर्युदासप्रतिषेधश्चेति। तयोः स्वरूपनिर्णयप्रसङ्गे आपदेवेन उच्यते-

पर्युदासः स विज्ञेयो यत्र पूर्वपदेन नञ्।

प्रतिषेधः स विज्ञेयो यत्रोत्तरपदेन नञ्।। इति।[4]

उत्तरपदं चात्र प्रत्ययः। यथा न कलञ्जं भक्षयेत् इत्यत्र लिङा सह नञः अन्वयः, लिङ्-त्वांशस्य एव वाक्ये प्राधान्यात्। एवं यत्र लिङ्-त्वांशेन नञः अन्वयस्तत्र विधिप्रतिपाद्यप्रवर्तनाविपरीता निवर्तना एव बोध्यते। तत्र प्रसज्यप्रतिषेधः। प्रत्ययभिन्नं सर्वं पूर्वपदम्। नामधातुयोगे नञः प्रतिषेधकत्वं नाङ्गीक्रियते, तयोरविधायकत्वात्। उच्यते चातः श्लोकवार्त्तिके—

1 *वैयाकरणभूषणसारे* नञर्थनिर्णयः, पृ ३५३

2 *निरुक्तम्*, पृ. १४

3 *मीमांसान्यायप्रकाशः* २५४-२५५

4 *मीमांसान्यायप्रकाशः* २५२

नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः।

वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनौ।। (श्लोकवार्त्तिकम् ३३) इति। एवम् अब्राह्मणमानय इत्यादिषु न तु निषेधे अपि तु विधौ तात्पर्यम्। एवं 'नेक्षेतोद्यन्तमादित्यमि'त्यादावपि उपक्रमस्थव्रतशब्देन कर्तव्यतोक्तेः नञो धात्वर्थेनान्वयः, तेन च अनीक्षणसंकल्पस्य विधेयत्वमवगम्यते।

पर्युदासस्वरूपविषये अभियुक्तानां वचनमिदं प्रसिद्धं यत्-

प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता।

पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।। इति। पर्युदासपदस्य अन्योन्याभावः अर्थः। एवम् अब्राह्मणमानयेत्यत्र पूर्वपदे नञि सति उत्तरपदार्थेन ब्राह्मणेन सह सम्बद्धे क्षत्रिये लक्षणा। अघटः पटः इत्यत्र नञः पर्युदासार्थसत्त्वेऽपि पदद्वयस्य समानविभक्त्युपस्थापितत्वात् अघटपदस्य घटाभाववति लक्षणा। तेन च निर्बाधं शाब्दबोधः स्यात्। यत्र तु नञः क्रियासम्बन्धस्तत्र नञः प्रसज्यप्रतिषेध एवार्थः। यथा भूतले न घटः। प्रसज्यप्रतिषेधेन च संसर्गाभावो बोध्यते। उच्यते चातः—''प्रसज्यप्रतिषेधः स्यात्क्रियया सह यत्र नञ्''[5] इति।

## १.१ अद्वैतवेदान्तग्रन्थेषु नञर्थनिर्णयः

अत्यन्ताभावस्य अन्योन्याभावस्य[6] च नञर्थता शङ्कराचार्यादिभिरद्वैतवेदान्तिभिरप्यङ्गीक्रियते, सादृश्यादिषु च नञर्थसत्त्वं न कुत्रापि प्रतिषिध्यते। तथाहि शङ्कराचार्येण समन्वयाधिकरणभाष्ये उच्यते—''नञश्चैष स्वभावो, यत्स्वसम्बन्धिनोऽभावं बोधयतीति''[7] इति। पुनश्चोक्तं 'तद्धैक आहुरसदेवेदमग्र आसीत्' इति छान्दोग्योपनिषन्मन्त्रव्याख्यानावसरे ''तत्र नञ् सद्वाक्ये प्रयुक्तः सद्वाक्यमेवावलम्ब्य सद्वाक्यार्थविषयां बुद्धिं सदेकमेवाद्वितीयमिदमासीदित्येवंलक्षणां ततः सद्वाक्यार्थान्निवर्तयति, अश्वारूढ इव अश्वालम्बनः अश्वं तदभिमुखविषयान्निवर्तयति—तद्वत्। न तु पुनः सदभावमेव विधत्ते। अतः पुरुषस्य विपरीतग्रहणनिवृत्त्यर्थपरम् इदमसदेवेत्यादि वाक्यं प्रयुज्यते''[8] इति। अत्र च असद् इत्यत्र श्रूयमाणस्य नञः न सत्पदार्थेन किन्तु क्रियान्वये प्रसज्यप्रतिषेधे एव तात्पर्यमिति अभ्युपगम्यते। 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इत्यत्र आत्मनः शरीरतादात्म्याभावः एव सूचितः इति शाङ्करोऽभिप्रायः, तेनात्र

5 *मीमांसान्यायप्रकाशः* २६१

6 अभावचातुर्विध्यं शङ्कराचार्यस्याप्यभिमतम् इति *बृहदारण्यकोपनिषदः* प्रथमाध्यायास्य द्वितीयब्राह्मणस्य ''नैवेह किञ्चनाग्र आसीत्'' इति प्रथममन्त्रभाष्ये स्पष्टम्। तथाहि शङ्कराचार्यैरुक्तम्—''न च घटाभावः सन्पटः अभावात्मकः; किं तर्हि? भावरूप एव। एवं घटस्य प्राक्प्रध्वांसात्यन्ताभावानामपि घटादन्यत्वं स्यात्, घटेन व्यपदिश्यमानत्वात्, घटस्येतरेतराभाववत्; तथैव भावात्मकताभावानाम्'' इति। इतरेतराभावपदेन चान्योन्याभावः प्रतिपादितः इति स्पष्टं बुध्यते। (*बृहदारण्यकोपनिषद्*, पृ १९-२०)

7 *ब्रह्मसूत्रम्* १.१.४., पृ. ९२

8 *छान्दोग्योपनिषद्*, ६.२.१, पृ. २२०-२२१

अशरीरमिति शरीरभिन्नत्वस्यैव ख्यापकमिति अशरीरपदघटकनञः तदन्यत्वरूपान्योन्याभाव एवार्थः इति गम्यते। तथाह्युच्यते शङ्कराचार्येण—''अशरीरस्वभावस्य आत्मनः तदेवाहं शरीरं शरीरमेव च अहम्—इत्यविवेकादात्मभावः सशरीरत्वम्; अत एव सशरीरः सन् आत्तः ग्रस्तः प्रियाप्रियाभ्याम्''[9] इति। तदन्यत्वस्य चान्योन्याभावाव्यतिरिक्तत्वमुक्तं धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायाम् अभावस्वरूपनिरूपणकाले—''इदमिदं नेति प्रतीतिविषयोऽन्योन्याभावः. अयमेव विभागो भेदः पृथक्त्वं चेति व्यपदिश्यते, भेदातिरिक्तविभागादौ प्रमाणाभावात्''[10] इति। मधुसूदनसरस्वतीस्वामिना कुत्रात्यन्ताभावः कुत्र वान्योन्याभावः नञर्थः इति अद्वैतसिद्धौ द्वितीयमिथ्यात्वलक्षणविचारप्रसङ्गे प्रतिपादितम्। ग्रथितं च तेन स्वग्रन्थे—''एकविभक्त्यन्तपदोपस्थापिते धर्मिणि प्रतियोगिनि च नञः अन्योन्याभावबोधकत्वनियमस्य व्युत्पत्तिबलसिद्धत्वात्''[11] इति, ''नात्र रजतम् इति वाक्याभिलप्या तु प्रतीतिरत्यन्ताभावविषया, भिन्नविभक्त्यन्त-पदोपस्थापितयोरेव धर्मिप्रतियोगिनोः नञः संसर्गाभावबोधकत्वनियमात्''[12] इति च। इतरेषामपि लक्ष्याणाम् नञर्थानां व्यवहारः अद्वैतवेदान्तग्रन्थेषु सुलभः।

विवरणे नवमवर्णके प्रकाशात्मयतिना पद्मपादाचार्योक्तिमनुसृत्य नञर्थविचारः प्रस्तुतः। सिद्धान्तरूपेण तेन प्रस्तुतं यत् संसृज्यमानाभावमेव मुख्यया वृत्त्या नञ्-शब्दः प्रतिपादयति इति। अत्र चात्यन्ताभाव एव नञर्थ इति प्रतिपादितम्। न च भावान्तरमेव अभाव इति प्राभाकरमतं युक्तम्, अभावस्य सप्रतियोगिकत्वात्। तद्भिन्न-तद्विरुद्धत्वादीनामर्थानां तु लक्षणयोपस्थितिर्बोध्या। उच्यते च तेन—''अभाव एव च नञो मुख्योऽर्थः, अर्थान्तरविरोधिनोरभावसम्बन्धिनोर्लक्षणयापि प्रवृत्तिसम्भवे रूढिकल्पनायोगात्। ननु- 'नाम-धात्वर्थयोगे तु नैव नञ् प्रतिषेधकः। वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनौ।।' इत्यर्थान्तरेऽपि नञ्-शब्दो दर्शितः, सत्यम्, तत्रापि मुख्यार्थान्वयेन लक्षणयार्थान्तरेऽपि बुद्धिनियमो दर्शित इत्यविरोधः''[13] इति।

## २. अद्वैतसिद्धान्तेषु नञर्थविचारः

अद्वैतवेदान्तस्य सिद्धान्तः शङ्कराचार्येणैव संगृहीतः—''ब्रह्म सत्यं, जगन्मिथ्या, जीवो ब्रह्मैव नापरः''[14] इति। ब्रह्मणः सत्यत्वप्रसङ्गे ब्रह्माद्वैतं सदद्वैतमिति, जगन्मिथ्यात्वप्रसङ्गे

---

9 *छान्दोग्योपनिषद्भाष्यम्* ८.१२.१, पृ. ४०१

10 *वेदान्तपरिभाषायाम्* अनुपलब्धिपरिच्छेदे, पृ. ३५६

11 *अद्वैतसिद्धिः* पृ. ८९

12 *अद्वैतसिद्धिः* पृ. ९२

13 *पञ्चपादिकाविवरणम्* पृ. ६६६

14 *ब्रह्मज्ञानावलीमाला* शङ्कराचार्यकृता श्लो. २१

अजातवादः, दृष्टिसृष्टिवादः सृष्टिदृष्टिवादश्चेति, जीवस्वरूपविषये जीवब्रह्मणोरैक्यविषये च प्रतिबिम्बवादः, अवच्छेदवादः आभासवादश्चेति प्रक्रियाभेददर्शनेऽपि ब्रह्मसत्यत्वजगन्मिथ्यात्वजीवब्रह्मैक्यरूपमूलतत्त्वाविरोधित्वं सर्वेषां वर्तते इति वीक्ष्य मूलतत्त्वविचारप्रसङ्गे एव कुत्र कुत्र नञर्थविचारस्योपकारित्वमिति आलोच्यते।

### २.१ अद्वैतपदार्थविचारकाले नञर्थविचारः

अद्वैतपदार्थविचारेऽपि नञर्थविचारो गुरुत्वमावहति। तथाहि द्वयोः भावः द्विता, द्विता एव द्वैतम्, न द्वैतम् अद्वैतम् इति, अथवा द्वाभ्याम् इतं द्वीतं, द्वीतस्य भावः द्वैतं, न द्वैतम् अद्वैतम् इति। उभयथापि द्वैतमित्यनेन धर्मविशेषस्योक्तिः, न द्वैतम् अद्वैतम् इति नञ्तत्पुरुषे च कृते द्वैतभिन्नधर्मान्तरस्यैव ग्रहणम्। एवं धर्मपरकाद्वैतशब्देन न हि ब्रह्मणो निर्देशः सम्भवति, तस्य कथमपि धर्मस्वरूपत्वासम्भवात्। श्रूयते च माण्डूक्योपनिषदि—''प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते, स आत्मा स विज्ञेयः'' (माव्डुक्योपनिषत् ७) इति ब्रह्मपरकतयाद्वैतपदव्यवहारः। वार्त्तिककृताप्युच्यते अद्वैतपदार्थविचारवेलायां–

द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते।
तन्निषेधेन चाद्वैतं प्रत्यग्वस्त्वभिधीयते।। (बृ.उ.भा.वा ४.३.१८०७) इति।

निषेधश्चात्रात्यन्ताभावरूपः इति स्पष्टमन्यथा अद्वैतपदेन अभिधावृत्त्या ब्रह्मपदार्थोपस्थापनमसम्भवं स्यात्। अतः अविद्यमानं द्वैतमस्मिन् इति विग्रहे बहुव्रीहिसमासे[15] अद्वैतपदस्य सिद्धौ सर्वं सुसमञ्जसं भवति।[16] तेन च अद्वैतपदं द्वैताभावानुयोगि ब्रह्म एव सूचयति, न चानेन अभावाश्रयत्वात् ब्रह्मणः धर्मित्वापत्तिः, अभावस्य अधिष्ठानस्वरूपत्वात्। तेन च प्रतिपन्नोपाधौ ब्रह्मणि त्रैकालिकनिषेधप्रतियोगित्वात्, ब्रह्मरूपस्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वाद् वा द्वैतमिथ्यात्वमपि सुवचं भवति। ततश्च अद्वैतप्रतिपादको वेदान्तः अद्वैतवेदान्तः इति शाकपार्थिवादिवत् समासः। अतो ब्रह्मप्रतिपादकस्यास्य वेदान्तस्य मायावाद इति दुष्टाभिधानं प्रस्तुताभिधानेनैव प्रत्याख्यातं भवति।

### २.२ ब्रह्मलक्षणे नञर्थविचारः

तैत्तिरीयोपनिषदि ब्रह्मस्वरूपमाम्नातं—''सत्यं ज्ञानमनन्तं ब्रह्म'' ''आनन्दं ब्रह्मेति व्यजानात्'' इत्यादिश्रुतिभिः। अत्र च ब्रह्मणः स्वरूपलक्षणं प्रोक्तम्। लक्षणं च धर्मः। ननु धर्मः एव धर्मी न भवति, अतः सत्यादीनां धर्मत्वात् ब्रह्मस्वरूपता न सिध्यति इति चेद् अत्रोच्यते, असत्यव्यावृत्ताकारेण जडव्यावृत्ताकारेण दुःखव्यावृत्ताकारेण वृत्त्युपारूढत्वे सति धर्मधर्मिभावः

---

15 ''शेषो बहुव्रीहिः'' इति सूत्रेण ''नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः'' इति वार्त्तिकसहकृतेन समासः।

16 *अद्वैतसिद्धिः* इति ग्रन्थाभिधानविचारकाले *बालबोधिनीटीकायां* योगेन्द्रनाथवाग्चीमहाभागेन अद्वैतसिद्धिपदस्य एवमर्थो विहितः—द्वैताभावोपलक्षितब्रह्मनिर्विकल्पकनिश्चयः इति। अत्रापि अद्वैतशब्देन ब्रह्मपदार्थ एव सूचितः। ( *अद्वैतसिद्धिः,* प्रथमः भागः, पृ. ६)

कल्पयितुं शक्यते। उच्यते च पञ्चपादिकाकारेण—''आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते'' इति। किञ्च, सत्यादिपदानां धर्मरूपतानङ्गीकारेऽपि तेषां ब्रह्मस्वरूपता लक्षणं च बोधयितुं शक्यमिति वालबोधिनीटीकायामुपदिश्यते। अत्र योगेन्द्रनाथानां मते तावत् सत्यत्वादिकं न ब्रह्मणो धर्मः, ब्रह्मणो निर्धर्मकत्वात्। अत्र च सत्यत्वं नाम मिथ्यात्वाभावः, ज्ञानत्वं नाम जडत्वाभावः, आनन्दत्वं च दुःखत्वाभावः[17]। मिथ्यात्वाद्यभावरूपाणां सत्यत्वादीनां ब्रह्मस्वरूपविरोधो नास्ति, अभावस्य अधिष्ठानस्वरूपत्वात्। अतः सत्यपदस्य मिथ्या न, ज्ञानपदस्य जडं न, आनन्दपदस्य च दुःखं न इत्येवमर्थो निर्णेयः। अनन्तपदस्य अन्तवद्वस्तुव्यावृत्त्या ब्रह्मविशेषणत्वं शङ्कराचार्येणैवाभिहितं— ''तत्रानन्तशब्दोऽन्तवत्त्वप्रतिषेधद्वारेण विशेषणम्''[18] इति। अतोऽत्र मिथ्याजडदुःखान्योन्याभावद्वारा ब्रह्मस्वरूपं निरूपितिमिति स्पष्टम्। 'ब्रह्मविदाप्नोति पर'मिति ब्रह्मविदः ब्रह्मस्वरूपावाप्तिं प्रतिपाद्य ब्रह्मस्वरूपत्वेन मिथ्याभावादीनां श्रुतत्वात् अत्र पर्युदासप्रतिषेध इति स्पष्टम्। अन्योन्याभावस्थले साधारणतया पर्युदासप्रतिषेधस्यैव अवसरो दृश्यते।

ब्रह्मणो निर्देशः विधिमुखेन निषेधमुखेन च सम्भवति। उपनिषत्सु ''सत्यं ज्ञानमनन्तं ब्रह्म'' इत्यादौ विधिमुखेन, ''नेति नेति'' इत्यादौ च निषेधमुखेन ब्रह्म निर्दिश्यते। निषेधमुखेन ब्रह्मस्वरूपप्रतिपादनकाले नञर्थविचारं व्यतिरिच्य मार्गान्तरमेव न विद्यते इति अनुक्तसिद्धम्। अतः ''अशब्दमस्पर्शमरूपमव्ययम् तथारसं नित्यमगन्धवच्च यत्'' (कठ. १.३.१५), ''यत्तदद्रेश्यम् अग्राह्यम् अगोत्रवर्णम् अचक्षुःश्रोत्रं तदपाणिपादम्'' (मुण्डक. १.१६), ''अदृश्यम् अव्यवहार्यम् अग्राह्यम् अलक्षणम् अचिन्त्यम् अव्यपदेश्यम्'' (माण्डूक्य. ७), ''स एष नेति नेत्यात्मागृह्यो न गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न हि व्यथते'' (बृ. ४.४.२२), ''य आत्मा अपहतपाप्मा विजरो विमुत्युर्विजिघत्सोऽपिपासः'' (छा. ८.७.१),''असद्वा इदमग्र आसीत्'' (तै. २.६.१) इत्यादिषु श्रुतिषु नञर्थनिश्चयः शङ्कराचार्येण विहितः। तथाहि—''अस्थूलम् स्थूलादन्यत्'', ''अनादिः अविद्यमानः आदिः कारणमस्य'', ''अद्रेश्यम् अदृश्यं सर्वेषां बुद्धीन्द्रियाणाम् अगम्यम्'', ''अनेजत् कम्पनं चलनं स्वावस्थाप्रच्युतिः, तद्विवर्जितं सर्वदैकरूपम्'', ''अमात्रः मात्राः यस्य न सन्ति'' इत्येवमादीनि शाङ्करभाष्यवचांसि उपनिषद्वाक्यविचारवेलायां मुहुर्मुहुरालोक्यन्ते। 'नेति नेति' इति निषेधमात्रप्रतिपादनात् सर्वेषां निषेधे शून्यतापत्तिरिति नैव चिन्तनीयम्, न हि अद्वैतवेदान्ते निरवधिको निषेधः प्रतिपाद्यते येन शून्यवादप्रसङ्गः

---

17 अत्र सत्यत्वादिकं न ब्रह्मणः धर्मः, तस्य निर्धर्मकत्वात्, किन्तु मिथ्यात्वाद्यभावरूपं सत्यत्वादिकम्; अधिकरणातिरिक्ताभावानभ्युपगमेन मिथ्यात्वाद्यभावरूपस्य सत्यत्वादेर्ब्रह्मस्वरूपाविरोधात्। (*अद्वैतसिद्धिः,* प्रथमभागः, पृ २)

18 *तैत्तिरीयोपनिषदो* द्वितीयवल्ल्याः प्रथमानुवाकस्य शाङ्करभाष्ये (*उपनिषद्भाष्यम्,* प्रथमो भागः, पृ. ४४९)

स्यात्। सर्वेषां निषेधे सत्यपि निषेधकर्तुः निषेधो नैव सम्भवति। निषेधकर्ता एव आत्मा।

उक्तं च विद्यारण्यस्वामिना-

इदं रूपं तु यद्यावत्त्यक्तुं शक्यतेऽखिलम्।

अशक्यो ह्यनिदं रूपं स आत्मा बाधवर्जितः॥ (*पञ्चदशी* ३.३३)इति। यद्वा, ब्रह्मानुयोगिकत्वात् प्रपञ्चनिषेधस्य न शून्यवादप्रसङ्गः। अधिष्ठाने हि आरोप्यस्य निषेधः प्रतिपाद्यते उपपत्तिभिः। सत्यं ब्रह्म चात्र अधिष्ठानम् इति न शून्यतापत्तिः।

**२.३ मिथ्यात्वलक्षणे नञर्थविचारः**

जगन्मिथ्यात्वप्रतिपादनकाले नञर्थस्य निषेधस्य विचारः महता प्रयत्नेन अद्वैताचार्यैर्विहितः। व्यासतीर्थकृतन्यायामृतग्रन्थखण्डनात्मके मधुसूदनसरस्वतीकृते अद्वैतसिद्धिग्रन्थे मिथ्यात्वस्य पञ्च लक्षणानि विहितानि। तानि यथाक्रमं—सदसत्त्वानधिकरणत्वम्, प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्, ज्ञाननिवर्त्यत्वम्, स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वम्[19] सद्विविक्तत्वम् इति।

एतानि सर्वाण्येव लक्षणानि नञर्थघटितानि। प्रथमलक्षणे अनधिकरणत्वस्यात्यन्ताभावरूपार्थः, द्वितीयलक्षणे त्रैकालिकनिषेधस्य अत्यन्ताभावान्योन्याभावोभयरूपार्थः, तृतीयलक्षणे ज्ञाननिवर्त्यत्वस्य ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वरूपतात्पर्यार्थकथनात् निवृत्तिपदेन अत्यन्ताभावरूपार्थः पञ्चमलक्षणे च विवेकपदेन अन्योन्याभावरूपार्थश्च गृह्यन्ते। चतुर्थलक्षणे अत्यन्ताभावस्य साक्षान्निर्देशो वर्तते।

एतेषु पुनर्द्वितीयमिथ्यात्वलक्षणालोचनवेलायां 'नेह नानास्ति' इत्यादौ विधीयमानस्य त्रैकालिकनिषधेस्य का सत्तेति विषये सुगभीरमालोचनं वीक्ष्यते। तथाहि—प्रतिपन्ने प्रतीतिविशेष्ये उपाधौ अधिकरणे ब्रह्मणि वर्तमानः यस्त्रैकालिको निषेधः "इह नाना (भेदेन प्रतिभासमानः प्रपञ्चः) नास्ति" इति, तस्य निषेधस्य पारमार्थिकत्वे ब्रह्मणः निषेधस्य च पारमार्थिकत्वात् द्वैतप्रसङ्गात् अद्वैतहानिः, निषेधस्यास्य प्रातिभासिकत्वे प्रपञ्चस्य सत्यत्वापत्तिः, तेन च द्वैतसम्मतप्रपञ्चसत्यत्वस्यैव सिद्धिप्रसङ्गात् सिद्धसाधनम्, निषेधस्य व्यावहारिकत्वे ब्रह्मज्ञानेन निषेधस्यापि बाधितत्वात् प्रपञ्चस्य अबाध्यत्वं च उपपद्यते इति अर्थान्तरं दोषः, नेह नानेति श्रुतौ व्यावहारिकनिषेधरूपबाधितार्थप्रतिपादनात् श्रुतेः तत्त्वावेदकत्वाभावः, प्रपञ्चस्य प्रातिभासिकभिन्नस्य पारमार्थिकत्वं चापद्येत इति उभयतः पाशारज्जुः। अत्र सिद्धान्तरूपेण निषेधस्य प्रातिभासिकव्यतिरिक्तसत्ताद्वयस्वीकारे नास्ति दोष इति प्रतिपाद्यते। तथाहि निषेधस्यास्य पारमार्थिकत्वेऽपि नाद्वैतहानिः, निषेधस्य

19 सर्वेषामेव भावानां स्वाश्रयत्वेन सम्मते।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता।। (*तत्त्वप्रदीपिका* १.७)

20 अभावस्याधिकरणस्वरूपत्वमद्वैतिभिरङ्गीक्रियते।

प्रपञ्चाधिकरणीभूतब्रह्माभिन्नत्वात्[20]। निषेधस्य व्यावहारिकत्वाङ्गीकारेऽपि न अर्थान्तरतापत्तिः निषेधस्य बाधमात्रेण न प्रतियोगिनः प्रपञ्चस्य पारमार्थिकत्वं सम्भवति, अत्र निषेधस्य निषेध्यस्य च समानसत्ताकत्वात् ब्रह्मज्ञानेन उभयोरेव बाधः। यत्र निषेधः निषेध्यापेक्षया न्यूनसत्ताकः तत्रैव निषेधनिषेधेन प्रतियोगिसत्त्वमायाति। तथाहि यत्र निषेधस्य निषेधेन प्रतियोगिनः सत्त्वं व्यवस्थाप्यते, निषेधमात्रं निषिध्यते तत्र निषेधनिषेधेन प्रतियोगिसत्त्वप्रसङ्गः। तथाहि इदं रजतम् इति ज्ञानात्परम् इदं न अरजतम् इति ज्ञानेन रजतं सिध्यति, अत्र निषेधस्यैव निषेधो विधीयते। यत्र प्रतियोगिनिषेधयोरुभयोरेव निषेधः तत्र न प्रतियोगिसत्त्वापत्तिः, यथा स्वाप्नविषयाणां स्वाप्ननिषेधानन्तरं जाग्रदवस्थायां स्वाप्ननिषेधस्यापि निषेधे न स्वाप्नविषयाणां सत्यत्वापत्तिः। यतो हि जाग्रत्कालीननिषेधेन यथा स्वाप्ननिषेधः तथा स्वाप्ननिषेधप्रतियोगिनामपि निषेधः सम्भवति इति। तथाहि स्वप्ने अयं गजो न इति गजनिषेधस्य जाग्रत्काले निषेधेन न हि गजस्याविर्भावः, जाग्रत्कालीननिषेधेन यथा स्वाप्नगजनिषेधस्य तथा स्वाप्ननिषेधप्रतियोगिनो गजस्यापि निषेधात्। एवं ब्रह्मज्ञानेन प्रपञ्चनिषेधस्य तथा प्रपञ्चस्य उभयोरपि बाधः, उभयत्र दृश्यत्वादेस्तुल्यत्वात्। अतो न श्रुतेरतत्त्वावेदकत्वं मन्तव्यम्।

## २.४ अविद्यालक्षणे नञर्थविचारः

आविद्यकत्वात् जगतो मिथ्यात्वं सिद्धम्। अविद्या हि अस्य जगतः उपादानकारणम्। अविद्यालक्षण-विचारप्रसङ्गे चित्सुखाचार्येण उच्यते-

अनादिभावरूपं यद् विज्ञानेन प्रलीयते।

तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते॥ (*तत्त्वप्रदीपिका* १.९) इति। 'अनादिभावरूपत्वे सति ज्ञाननिवर्त्यत्वम्' इत्येवाज्ञानलक्षणमिति मधुसूदनसरस्वतीभिरपि चित्सुखपदाङ्कमनुसृत्योद्घोष्यते। न ज्ञानम् अज्ञानम् इति ज्ञानप्रागभावस्य अज्ञानपदार्थत्वम् अद्वैतवेदान्तिनो नाङ्गीकुर्वन्ति। तथात्वे अज्ञानस्याभावरूपत्वात् तस्य जगदुपादानत्वं न

---

21 ''तदेतद्विपरीतग्रहणं महावैनाशिकपक्षं दर्शयित्वा प्रतिषेधति—कुतस्तु प्रमाणात्खलु हे सोम्य एवं स्यात् असतः सज्जायेत इत्येवं कुतो भवेत्? न कुतश्चित्प्रमाणादेवं सम्भवतीत्यर्थः। यदपि बीजोपमर्देऽङ्कुरो जायमानो दृष्टः अभावादेवेति, तदप्यभ्युपगमविरूद्धं तेषाम्। कथम्? ये तावद्बीजावयवाः बीजसंस्थानविशिष्टाः तेऽङ्कुरेऽप्यनुवर्तन्त एव, न तेषामुपमर्दोऽङ्कुरजन्मनि। यत्पुनर्बीजाकारसंस्थानम्, तद्बीजावयवव्यतिरेकेण वस्तुभूतं न वैनाशिकैरभ्युपगम्यते, यदङ्कुरजन्मन्युपमृद्येत। अथ तदस्ति अवयवव्यतिरिक्तं वस्तुभूतम, तथा च सति अभ्युपगमविरोधः। अथ संवृत्या अभ्युपगतं बीजसंस्थानरूपमुपमृद्यत इति चेत्, केयं संवृतिर्नाम—किमसावभावः, उत भावः इति? यद्यभावः, दृष्टान्ताभावः। अथ भावः, तथापि नाभावादङ्कुरोत्पत्तिः, बीजावयवेभ्यो हि अङ्कुरोत्पत्तिः। अवयवा अप्युपमृद्यन्त इति चेत्, न, तदवयवेषु तुल्यत्वात्। यथा वैनाशिकानां बीजसंस्थानरूपोऽवयवी नास्ति, तथा अवयवा अपीति तेषामप्युपमर्दानुपपत्तिः। बीजावयवानामपि सूक्ष्मावयवाः तदवयवानामप्यन्ये सूक्ष्मतरावयवाः इत्येवं प्रसङ्गस्यानिवृत्तेः सर्वत्रोपमर्दानुपपत्तिः। सद्बुद्ध्यनुवृत्तेः सत्त्वानिवृत्तिश्चेति सद्वादिनां सत एव सदुत्पत्तिः सेत्स्यति। न तु असद्वादिनां दृष्टान्तोऽस्ति असतः सदुत्पत्तेः।'' (*छान्दोग्योपनिषदः* ६.२.१-तममन्त्रस्य*शाङ्करभाष्ये*)

सम्भवेत्, अभावात् भावोत्पत्तिः छान्दोग्योपनिषद्भाष्ये[21] शङ्कराचार्येण बहुधा दूषिता। अतोऽज्ञानं भावरूपमिति कथ्यते।

अज्ञानस्य अभावरूपत्वे किम् अज्ञानं ज्ञानविशेषाभावो ज्ञानसामान्याभावो वेति वक्तव्यम्। न हि ज्ञानविशेषाभाव एव अज्ञानम्, मूढः अहं किञ्चित् न जानामि, अहमज्ञः इत्याद्यनुभवस्थलेषु विषयविशेषस्य अनुल्लेखात् ज्ञानविशेषाभाव एव अज्ञानमिति वक्तुं न शक्यते। न च तत्रापि ज्ञानविशेषाभावे एव तात्पर्यम् इति वक्तव्यं, कामपि अनुपपत्तिं विनैव सामान्यज्ञानस्य विशेषज्ञानालम्बनत्वस्वीकारे सामान्यज्ञानविलोपः प्रसज्येत। विशेषज्ञानालम्बनसामान्यज्ञानाङ्गीकारे तु घटवत्यपि भूतले घटसामान्यनिषेधप्रसङ्गः स्यात्, नीलघटवति भूतले पीतघटाभावप्रतिपादनद्वारा घटसामान्याभावप्रसङ्गात्। किञ्च, सुषुप्त्यभावप्रसङ्गोऽपि आपतेत्, सुषुप्तौ ज्ञानसामान्यस्य अभावानुभवात्। अतो ज्ञानसामान्याभाव एव अज्ञानमिति द्वितीयः पक्षः आपतितः। अयमपि पक्षो न समीचीनः। अभावज्ञानम् अनुयोगिप्रतियोगिज्ञानसापेक्षम्। ज्ञानसामान्याभावरूपाज्ञानप्रतिपादनकाले आत्मनि अनुयोगिनः प्रतियोगिनश्च ज्ञानं वर्तते। अतः आत्मनि ज्ञानस्य सत्त्वात् ज्ञानाभावः कथं प्रतिपादितः स्यात्। अतः ज्ञानाभावरूपम् अज्ञानं नैव युक्तिसहम्। उच्यते च विवरणे—''मयि ज्ञानं नास्तीति प्रतिपत्तावात्मनि धर्मिणि प्रतियोगिनि चार्थेऽवगते तत्र ज्ञानसद्भावात् ज्ञानाभावप्रतिपत्त्ययोगात्'' इति। ननु भावरूपाज्ञानस्य अप्रसिद्धेः, अज्ञानस्य अभावरूपत्वस्वीकारे एव लाघवमिति चेन्न, देवात्मशक्तिं स्वगुणैर्निगूढाम्, मायां तु प्रकृतिं विद्यात् इत्यादिश्रुतिषु भावरूपाज्ञानस्य प्रतिपादनात् नाप्रसिद्धिः। अतो भावरूपम् एव अज्ञानमिति सिध्यति। अतो ज्ञानप्रागभावरूपाभिहितार्थस्यासम्भवात् ज्ञानविरोधित्वरूपार्थे अज्ञानपदस्य लक्षणया वृत्तिर्बोध्यव्या। अतोऽविद्याशब्दे नञो विरोधित्वमर्थः। अतोऽज्ञानलक्षणनिरूपणप्रसङ्गे सदानन्दयोगीन्द्रेणापि उच्यते—''अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित्''[22] इति।

अहमज्ञः इत्याद्यनुभवेषु प्रत्यक्षप्रमाणेन एव अज्ञानम् अनुभूयते, अहं सुखीत्यादिवत्। अज्ञानस्य अभावरूपत्वे तत् अनुपलब्धिरूपषष्ठप्रमाणेन गृहीतं स्यात्। भावरूपाज्ञानसिद्धौ अनुमानं च प्रदर्शितं विवरणे—''विवादगोचरापन्नं प्रमाणज्ञानं, स्वाप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं भवितुमर्हति, अप्रकाशितार्थ-प्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति। ततश्च ज्ञानेन समानश्रयविषयं भावरूपमज्ञानं सिद्धम्''[23] इति। 'मायां तु प्रकृतिं विद्यात्' (श्वे.उ. ४.२०) 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' (श्वे.उ. १.३) 'त इमे सत्याः कामा अनृतापिधाना'

22 *वेदान्तसारः,* पृ. ५०

23 *पञ्चपादिकाविवरणम्,* पृ. ५२

इत्यादिश्रुतयः भावरूपाज्ञानसत्त्वे प्रमाणम्। अर्थापत्तिरप्यत्र प्रमाणम्। तथाहि 'तरति शोकमात्मविद्' (छा.उ. ७.१.३) इत्यादिना ब्रह्मज्ञानात् शोकनिवृत्तिः बन्धस्याविद्यात्मकत्वं विनानुपपन्ना इति कारणभूता भावरूपाविद्या कल्प्यते इति श्रुतार्थापत्तिः। इदं रजतम् इति शुक्तिकायां च मिथ्याभूतस्य रजतस्य मिथ्याभूतमेव किञ्चिदुपादानं स्यात्, अन्यथा रजतस्य उत्पत्त्यनुपपत्तेः। अतः दृष्टार्थापत्तिप्रमाणेनापि मिथ्यारजतस्य कारणरूपेण भावरूपम् अज्ञानं कल्पितं भवति। एवं प्रमाणपञ्चकेन भावरूपमज्ञानं साधयन्ति अद्वैतवेदान्तिनः।

वस्तुतस्तु अज्ञानं भावाभावविलक्षणम् अनिर्वचनीयम्। अज्ञानस्य भावरूपत्वकथनं तस्याभावविलक्षणत्वप्रतिपादनार्थमेव। अविद्याया भावरूपत्वे सा जगति विद्यमानानाम् अभावपदार्थानामुपादानं न स्यात्। अतः अविद्यायाः भावाभावोभयविलक्षणत्वम्, तस्माच्च भावाभावाभ्याम् अनिर्वचनीयत्वम् अविद्यायाः सिध्यति। तथाह्युच्यते मधुसूदनसरस्वतीस्वामिना अद्वैतसिद्धौ अज्ञानलक्षणनिरुक्तिप्रसङ्गे—"भावत्वं चात्राभावविलक्षणत्वमात्रं विवक्षितम्, अतः आरोपिताभावोपादानाज्ञानेऽप्यभावविलक्षणत्वस्वीकारान्नाव्याप्तिः"[24] इति।

### ३. उपसंहारः

अद्वैतवेदान्तस्य मुख्यविषयाणां ब्रह्मलक्षण-जगन्मिथ्यात्व-जगदुपादानाविद्यालक्षणादीनां नञर्थघटितत्वात् अद्वैतवेदान्तसम्बद्धेषु अखिलेषु एव ग्रन्थेषु नञर्थविचारः प्रस्तूयते, पूर्वाचार्याणां वा सिद्धान्ता अनुस्रियन्ते। अद्वैतवेदान्ते अत्यन्ताभाव एव नञ्वाच्यार्थरूपेणाङ्गीकृतः। इतरेषामर्थानां तु लक्षणया ग्रहणं भवति। नञ्प्रतिपादितप्रतिषेधस्य पर्युदासप्रतिषेधप्रसज्यप्रतिषेधरूपद्वैविध्यम् उपनिषद्वाक्यार्थविचारकाले शङ्कराचार्येणासकृत् प्रस्तुतं, परवर्तिभिरद्वैताचार्यैरङ्गीकृतञ्च। प्रपञ्चनिषेधवेलायां 'नेति नेति' इति सर्वेषामेव प्रापञ्चिकवस्तूनां निषेधप्रतिपादनात् इदं वैतण्डिकशास्त्रमिति केचन वदन्ति। परन्तु मतमिदं विचार्यम्। वितण्डा हि स्वपक्षस्थापनहीना परपक्षनिराकरणमात्रप्रयोजना कथा। अद्वैतवेदान्ते परपक्षनिराकरणेन सह अद्वैतब्रह्मसत्यत्वरूपस्वपक्षस्थापनापि विधीयते। अतः शास्त्रस्यास्य वैतण्डिकत्वकथनम् अनवबोधविजृम्भितमेवेति शम्।

### परिशीलितग्रन्थसूची

आपदेवः *मीमांसान्यायप्रकाशः* वासुदेवशास्त्रिकृतप्रभाव्याख्यासमेतः पुण्यपत्तनम्: भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, १९३७।

*उपनिषद्भाष्यम्.* सम्पा. मणिद्रविडः, प्रथमखण्डः, वाराणसी : दक्षिणामूर्तिमठ-प्रकाशनम्, २०११ (इदं द्वितीयसंस्करणम्, प्रथमसंस्करणं सुब्रह्मण्यशास्त्रिणा सम्पादितम्).

*उपनिषद्भाष्यम्.* सम्पा. सुब्रह्मण्यशास्त्री. द्वितीयखण्डः, वाराणसी : दक्षिणामूर्तिमठ-

24 *अद्वैतसिद्धिः,* द्वितीयः भागः, पृ. १०८३

प्रकाशनम्, २०१२ (इदं द्वितीयसंस्करणम्)

*उपनिषद्भाष्यम्.* सम्पा. सुब्रह्मण्यशास्त्री, तृतीयखण्डः, वाराणसीः, दक्षिणामूर्तिमठ-प्रकाशनम्, २०११ (इदं द्वितीयसंस्करणम्)

कौण्डभट्टः. *वैयाकरणभूषणसारः* प्रभादर्पणव्याख्यायुक्तः. सम्पा. तारकेश्वरशास्त्रिचतुर्वेदी. बलियामण्डलम् : १९४७ (इदं प्रथमं संस्करणम्)

चित्सुखाचार्यः. *तत्त्वप्रदीपिका* नयनप्रसादिनीसहिता. सम्पा. हनुमानदास-षट्शास्त्री. काशी-संस्कृत-ग्रन्थमाला २४२. वाराणसी : चौखम्बा-संस्कृत-संस्थानम्, १९८७.

धर्मराजाध्वरीन्द्रः. *वेदान्तपरिभाषा.* सम्पा. गजानन-शास्त्रि-मुसलगाँवकरः, वाराणसी : चौखम्बा-विद्याभवनम्, २०१० (पुनर्मुद्रिता).

धर्मराजाध्वरीन्द्रः. *वेदान्तपरिभाषा* (शिखामणि-मणिप्रभासहिता). सम्पा. पारसनाथ-द्विवेदी. सरस्वतीभवनग्रन्थमाला १३८. वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २०००

पद्मपादाचार्यः. *पञ्चपादिका.* सम्पा. सुब्रह्मण्यशास्त्री. वाराणसीः दक्षिणमूर्तिमठप्रकाशनम्, २००९ (इदं द्वितीयसंस्करणम्).

मधुसूदनसरस्वती. *अद्वैतसिद्धिः* (बालबोधिन्याखया व्याख्ययोद्भासिता). सम्पा. शीतांशुशेखरवागची. प्रथमो भागः. वाराणसी : रत्ना-पब्लिकेशनस्, १९७१.

मधुसूदनसरस्वती. *अद्वैतसिद्धिः* (बालबोधिन्याख्यया व्याख्ययोद्भासिता). सम्पा. शीतांशुशेखरवागची. द्वितीयो भागः. वाराणसी : रत्ना-पब्लिकेशनस्, १९७१.

मेदिनीकरः. मेदिनीकोशः. सम्पा. जगन्नाथशास्त्री होशिङ्गः. वाराणसीः चौखम्बा-संस्कृत-सिरिज्-अफिस, १९६८ (इदं तृतीयं संस्करणम्).

यास्काचार्यः. *निरुक्तम्* मुकुन्द-झा-शर्मणा कृतया निरुक्तविवृत्या टिप्पण्यादिभिः समुपेतं. व्रजजीवन-प्राच्यभारती-ग्रन्थमाला ४१, दिल्ली : चौखम्बा-संस्कृत-प्रतिष्ठानम्, २०१२ (पुनर्मुद्रणम्).

विद्यारण्यः. *पञ्चदशी.* सम्पा. नारायणराम-आचार्यः, व्रजजीवन-प्राच्यभारती-ग्रन्थमाला २२. वाराणसी : चौखम्बा-संस्कृत-प्रतिष्ठानम्, २००८

सदानन्दयोगीन्द्रः,. *वेदान्तसारः.* सम्पा. अनु. ब्रह्मचारिमेधाचैतन्यः, कोलकाता : आद्यापीठम्, २०१० (तृतीयसंस्करणस्य पञ्चममुद्द्रणम्).

सुरेश्वराचार्यः. *बृहदारण्यकभाष्यवार्त्तिकम्.* प्रथमखण्डः. सम्पा. सुब्रह्मण्यशास्त्री. वाराणसी : महेशानुसन्धानसंस्थानम्, १९८२.

सुरेश्वराचार्यः. *बृहदारण्यकभाष्यवार्त्तिकम्.* द्वितीयखण्डः. सम्पा. सुब्रह्मण्यशास्त्री. वाराणसी : महेशानुसन्धानसंस्थानम्, १९९०.

शङ्कराचार्यः. *ब्रह्मसूत्रशाङ्करभाष्यम्.* सम्पा. जगदीशशास्त्री. दिल्ली : मोतीलाल बनारसीदास, २००० (पुनर्मुद्रणम्).

# संस्कृतसाहित्ये गन्धर्वः–एका समीक्षा

**दत्तोपाधिका शुभश्रीः**

(शब्दसंकेतः–ऋ.वे. = *ऋग्वेदसंहिता,* किरा. = *किरातार्जुनीयम्,* ना.लि. = *नामलिङ्गानुशासनम्,* ना.शा. = *नाट्यशास्त्रम्,* मनु. = *मनुसंहिता,* महा. = *महाभारतम्,* रघु. = *रघुवंशम्,* रा. = *रामायणम्,* श.ब्रा. = *शतपथब्राह्मणम्*)

## भूमिका–



**[10th century, Cham, Vietnam]**
**(नृत्योत्सवे अप्सरा नृत्यति, गन्धर्वश्च यन्त्रसङ्गीतं करोति)**

देवदानवगन्धर्वयक्षरक्षः–किन्नरादि–बहुविधानां नरादिपार्थिवेभ्यः उच्चस्तरीयाणां प्राणिनामुल्लेखः शास्त्रादिषु परिलक्ष्यते। भिन्नं तेषां देहवैशिष्ट्यं विलक्षणं च कार्यजालम्। ब्रह्माण्डस्य वैचित्र्यसाधने तेषामुपयोगिता पूर्वमेव परिकल्पिता विश्वसृजा। तत्र गन्धर्वो नाम एकमतीव प्राचीनं पदं यस्योल्लेखः विविधसाहित्ये परिलक्ष्यते। एषां गन्धर्वाणां प्रति अस्माकमाग्रहस्तु सनातनः। के तावत् गन्धर्वाः? कीदृशं तेषां गुरुत्वं साहित्ये समाजे वा? तान् प्रति मनुष्याणामाग्रहस्य किं कारणम्? सुप्राचीनवैदिकसाहित्ये गन्धर्वपदस्योल्लेखः दृश्यते। वैदिकयुगे ते उच्चश्रेण्यन्तर्गता उपदेवता इति गण्यन्ते। *ऋग्वेदे* (ऋ.वे.१६३२) आम्नातं यत् गन्धर्वः सूर्यस्य अश्वानां परिचालकः। गन्धर्वः वाद्ययन्त्रवादकः गायकश्च इति साधारणानां मतम्। तेषां निवासः गुह्यलोकस्य विद्याधरलोकस्य च मध्यवर्तिस्थाने। स्वर्गे तेभ्यः सुदर्शनतरः कोऽपि नास्ति इति कथितम्। पौराणिकमतानुसारेण गन्धर्वः कश्चिद् देवतुल्यः जातिविशेषः। संस्कृत–बौद्ध–जैन–ग्रन्थे तेषामुपस्थितिर्लक्ष्यते। शोधेऽस्मिन् अस्माभिः गन्धर्वविषयक–समीक्षा तथा साहित्ये तेषां प्रभावविषये पर्यालोचनं क्रियते तेषां तात्पर्यमपि आलोच्यते।

गन्धर्वः पुरुषवाचि पदम्। अस्य प्रयोगः एकवचने बहुवचने च लक्ष्यते। असौ

देवयोनि-विशेषः यस्यार्थः उपदेवता अर्धदेवता वा, नरदेवतयोर्मध्यवर्ती। उक्तं च *नामलिङ्गानुशासनस्य* प्रथमकाण्डे-

''विद्याधरोऽप्सरो-यक्षरक्षोगन्धर्वकिन्नराः।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः॥ (ना.लि. १/११)

तेषामुत्पत्तौ पितृरूपेण मातृरूपेण च प्रजापतिः ब्रह्मा कश्यपः मुनिः प्रधा अरिष्टा वाक् प्रभृतीनामुल्लेखः प्राप्यते। ते स्वर्गमर्त्त्यलोकमध्ये संयोगसाधकाः सन्ति। सूर्यचन्द्राभ्यां सह तेषां सम्बन्धः अस्ति। तेषां देहार्धांशः विहगेन अश्वेन तुल्यो वा इति कुत्रचित् लक्ष्यते। ते देवानां सोमरसप्रस्तुतकारिणः अथवा सोमरक्षकाः सन्ति। अथर्ववेदे तेषां गणना देवपितृगणाभ्यां सह लक्ष्यते। ओषधिना सह तेषां सम्बन्धः अस्ति। ते देवलोकस्य गायकाः सन्ति। एवं गायकरूपि-गन्धर्वाः इन्द्रस्यानुचराः आसन्। *रामायणं महाभारतञ्चेति* महाकाव्यद्वये गन्धर्वनगर्या उल्लेखः प्राप्यते। पुनः *महाभारते* गन्धर्वो नाम एकस्य जातेरुल्लेखः अस्ति ये पर्वते अरण्ये च निवसन्ति। संस्कृतसाहित्ये ललितकलाभिः सङ्गीतकलाभिः सह गन्धर्वस्य बहुविध उल्लेखः अस्ति। अजन्ताभित्तिचित्रे गगनचारिणो गन्धर्वस्य चित्रमङ्कितं दृश्यते। विवाहसूक्ते नवविवाहित-दम्पतीभ्यां गन्धर्वस्य आशीर्वचनं प्रार्थितम्-

''सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥'' (ऋ.वे. १०/८५/४०) इति।

हे कन्ये, तव (प्रथमः सोमः-विविदे) चन्द्रः सोमधर्मः-रजोधर्मस्त्वां प्राप्नोति (उत्तरः गन्धर्वः) तदुत्तरः-सूर्यो रश्मिधर्मस्त्वां प्राप्नोति (तृतीयः-अग्निः) तृतीयोऽग्निर्यज्ञाग्निर्वैवाहिको यज्ञाग्निस्त्वां प्राप्नोति (तुरीयः-ते मनुष्यजाः) चतुर्थस्ते पतिः-पालको भवति मनुष्यजातः।

(***ऋग्वेदभाष्यम्*-स्वामी ब्रह्ममुनिः परिव्राजकः**)

जातां कन्यां सोमः प्रथमभावी सन् विविदे। लब्धवान्। गन्धर्व उत्तरः सन् विविदे। लब्धवान्। अग्निस्तृतीयः पतिस्ते तव। पश्चान्मनुष्यजाः पतिस्तुरीयश्चतुर्थः।

(***सायणभाष्यम्***)

''सोमो ददद्गन्धर्वाय गन्धर्वो ददग्नये।
रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम्॥'' (ऋ.वे. १०/८५/४१)

(सोमः-गन्धर्वाय ददत्) सोमो रजोधर्मः सूर्याय रश्मिधर्माय तेजोधर्माय प्रयच्छति (गन्धर्वः-अग्नये) सूर्यो रश्मिधर्मोऽग्नये वैवाहिकाग्नये ददाति (अग्निः-रयिं च पुत्रान् च-इमां च मह्यम्-अदात्) वैवाहिकाग्निर्मह्यं पत्नीमिमां पुत्रान् तत्पितृधनं ददाति।

(***ऋग्वेदभाष्यम्*-स्वामी ब्रह्ममुनिः परिव्राजकः**)

सोमो गन्धर्वाय प्रथदुं ददत्। प्रादात्। गन्धर्वोऽग्नये प्रादात्। अथो अपि चाग्निरिमां

कन्यां रयिं धनं पुत्रांश्च मह्यमदात्।

(*सायणभाष्यम्*)

अद्यापि गीतैः ललितकलाभिः सह सम्बन्धी कलाकारः गन्धर्वनाम्ना परिचीयते।

## नामकरणम्-

सायणाचार्यः *ऋग्वेद*भाष्ये गन्धर्व-शब्दस्य द्वौ अर्थौ कृतवान्। प्रथमम् 'गवां रश्मीनां धर्ता सूर्यः' (ऋ.वे. १/१६२/२) द्वितीयं 'गामुदकं धारयतीति गन्धर्वो मेघः' (ऋ.वे. ८/७७/५) चेति। *शतपथब्राह्मणे* उक्तम्-

''गन्धर्वाप्सरसो हि भूत्त्वोदक्रामन्नथो गन्धेन च वै रूपेण च गन्धर्वाप्सरसश्चरन्ति तस्माद्यः कश्च मिथुनमुपप्रैति गन्धं चैव स रूपं च कामयते॥'' (श.ब्रा. ९/४/१/४)

गन्धर्वः अप्सराश्च कामयेते गन्धं रूपं च। 'अन्तराभवसत्त्वेऽश्वे गन्धर्वो दिव्य-गायने'इति *अमरकोषे*। तत्रोक्तं गन्धर्वः आतिवाहिकः जीवः, अश्वः स्वर्गीयः गायको वा। *अमरकोषस्य* क्षीरस्वामीति टीकायामुक्तम्-

'गन्धर्वास्तुम्वुरुप्रभृतयो देवगायकाः' इति।

'गन्ध-सङ्गीत-वाद्यादिजनितप्रमोदमर्वति प्राप्नोति गन्धर्वः स्वर्गगायकः'

इति *शब्दकल्पद्रुमः*।

गिरिशचन्द्र-विद्यारत्नेनः शब्दसारनामाभिधाने गन्धर्व-शब्दस्य व्युत्पत्तिः एवं प्रदर्शिता-गन्ध + अर्व-घे-अन्, तृतीयातत्पुरुषः इति। 'संसद वांला अभिधाने' शैलेन्द्र-विश्वासेन गन्ध + अर्व् (गति) + अ इति व्युत्पत्तिः निर्णीता। नासिकाया अनुभूतिग्राह्यो विषयः गन्धः। भ्वादिगणीयः अर्व-धातोः गतिरर्थः। अन्-प्रत्ययस्य-'न्'-वर्णस्य लोपो भवति, 'अः' क्रियामूलेन सह युक्तश्च। गोविन्दगोपालमुखोपाध्यायेन ***'A TRI-LINGUAL DICTIONARY'*** इत्यभिधाने गन्ध + अर्व-अच् इति व्युत्पत्तिः दर्शिता। वसुबन्धोः मतानुसारेण गन्धर्वस्यार्थः 'गन्धम् अर्वति' अर्थात्, गन्धभोक्ता इति।

## वैदिकमूलानुसन्धानम्

मर्त्य-दिव्यभेदेन गन्धर्वः द्विविधः। *ऋग्वेदे* (ऋ.वे. १/१६३/२) दिव्यः गन्धर्वः सूर्यस्य अश्वनियन्ता इति कथितः। ते देवातानां सहचराः, सोमरसस्य रक्षाकर्तारः, सोमरसस्य प्रस्तुतकारकाश्च। तदा सोमरसः विविधरोगाणाम् औषधरूपेण प्रसिद्धः आसीत्। तस्माद् गन्धर्वाः स्वर्गवैद्यनाम्ना ख्याताः। ते अग्नेः वरूणस्य दासा आसन्। एषां समाजे स्त्री-पुरुषयोः अतीव सख्यता ख्याता। ते इन्द्रस्य सभागायकाः, तत्र तेषां सङ्गिनी अप्सराः। ते प्रायशः सुन्दरीणां रमणीनाम् आकर्षणेन मर्त्यमागत्य ताभिः सह प्रणयं परिणयञ्च

अकुर्वन्। गन्धर्वस्य ईदृशादाचरणात् परवर्तिनि काले गान्धर्वविवाहस्य प्रचलनम् अभवत्। अथर्ववेदे एषां देहार्धांशः पश्वाकारः इति उल्लिखितः।

## पौराणिकमूलानुसन्धानम्

*विष्णुपुराणानुसारं,* ते ब्रह्मणः कान्तायाः जाताः। *वायुपुराणानुसारेण* कश्यप-पत्नी-कद्रोः गर्भजातः पुत्रः गन्धर्वः। *ब्रह्माण्डपुराणे* उक्तम्-गन्धर्वः अप्सरा च चित्ररथं वत्सं कृत्वा पद्मपात्रे शुचिगन्धः दुग्धः। तेभ्यः मुनेः पवित्रः पुत्रः विश्वावसुः दोग्धा आसीत्, स च गन्धर्वराजः। *हरिवंशपुराणे* उक्तम्-स्वारोचिषः मन्वन्तरे कश्यपस्य अन्यतमाया भार्याया दक्षकन्यायाः अहिष्टायाः गर्भे गन्धर्वो जातः।

## महाकाव्ये उल्लेखः

### *रामायणे*-

*रामायणे* शैलूषस्य त्रिकोटि-गन्धर्वाणां पुत्राणाम् उल्लेखः अस्ति, ये युद्धविद्यायां पारदर्शिनः। सिन्धुनदस्य उभयपार्श्वे तेषामेकः सुन्दरः देशः आसीत्।

उक्तञ्च *रामायणे*-

''अयं गन्धर्वविषयः फलमूलोपशोभिनः॥ (रा. ७/१००/१०)
सिन्धोरुभयतः पार्श्वे देशः परमशोभनः।
तं च रक्षन्ति गन्धर्वाः सायुधा युद्धकोविदाः॥ (रा. ७/१००/११)
शैलूषस्य सुता वीर तिस्त्रः कोट्यो महावलाः।'' (रा. ७/१००/११)

अयं देशो गन्धर्वनगरः इति कथितः यो गन्धर्वैः शासितः आसीत्। रामः इमं नगरं जेतुं भरतं प्रेरितवान्। भरतः नगरदुर्गमतिक्रम्य नगरं जितवान्। नान्यः कोऽपि नृपः गन्धर्वस्य जये समर्थः। भरतस्य द्वौ पुत्रौ तक्षः पुष्कलश्च आस्ताम्। तयोर्नाम्ना तक्षशिला पुष्कलावती चेति गन्धर्वसाम्राज्यद्वयस्य नाम अभवत्। तौ तयोरधिपतिं चकार भरतः।

### *महाभारते*-

*महाभारतस्य* आदिपर्वणि तपस्विनां वार्ताया इदं ज्ञायते यत् गन्धर्वः गीतवाद्यपारदर्शी। महाभारते ब्रह्मा देवराज इन्द्रः वैवस्वतो यमः कुवेरो वरुणो युधिष्ठिर इत्यादीनां सभायां गन्धर्वस्य उपस्थितिर्लक्ष्यते। सत्यवती-शान्तनोश्च पुत्रः चित्राङ्गदः मनुष्याणां निन्दामकरोत्। बलवान् गन्धर्वराजः चित्राङ्गदः छलेन कुरुराजं चित्राङ्गदं त्रिवर्षं यावत् युद्धे कुरुक्षेत्रे पराजितवान्। उक्तञ्च *महाभारते*-

''तस्मिन् विमर्दे तुमुले शस्त्रवर्षसमाकुले।
मायाधिकोऽवधीद्वीरं गन्धर्वः कुरुनन्दनम्॥ (महा. १/९५/१३)

स हत्वा तु नरश्रेष्ठं चित्राङ्गदमरिन्दमम्।
अन्ताय कृत्वा गन्धर्वो दिवमाचक्रमे ततः''॥
(महा. १/९५/१४)

चित्ररथः नाम एकः गन्धर्वः युधिष्ठिराय चतुःसहस्रम् अश्वान् अयच्छत्। उक्तञ्च *महाभारते*-

''राजा चित्ररथो नाम गन्धर्वो वासवानुगः।
शतानि चत्वार्यददद्धनां वायातरंहसाम्''॥
(महा. २/४८/२२)

चित्रसेनं नाम गन्धर्वं निकषा अर्जुनः नृत्यगीतशिक्षामकरोत् (महा. ३/४५/८)।



गन्धर्वराज-चित्राङ्गदेन सह कुरुराजशान्तनुपुत्रचित्राङ्गदस्य युद्धम्

द्वैतवनस्य कियदंशः गन्धर्वाणाम् अधिकृतः आसीद् यत्र पाण्डवाः वनवासकाले कियत्कालम् अतिष्ठन्। गन्धर्वः युद्धविद्यायां पारदर्शी। अर्जुनः तुम्बुरुनामकं गन्धर्वं निकषा अस्त्रविद्याशिक्षाम् अकरोत्। गन्धर्वैः सह कौरवाणां युद्धं संघटितम्। दुर्योधनः अवरुद्धः अभवत् कर्णश्च पलायितवान्। अर्जुनः दुर्योधनम् उद्धरति स्म। एकास्याः गन्धर्वनगर्याः उल्लेखः *महाभारते* प्राप्यते। ब्रह्मा गन्धर्वेभ्यः इमां नगरीम् अयच्छत्।

*श्रीमद्भगवद्गीतायां* गन्धर्वाणामुल्लेखः लक्ष्यते ये विस्मिताः सन्तः श्रीकृष्णस्य विश्वरूपम् अपश्यन्।

## *नाट्यशास्त्रे*-

*नाट्यशास्त्रस्य* पञ्चमाध्याये बहिर्गीतस्य कारणोल्लेखप्रसङ्गे उक्तम्—

''चित्रदक्षिणवृत्तौ तु सप्तरूपे प्रवर्तिते।
सोपोहने सनिर्गीते देवस्तुत्यभिनन्दिते॥ (ना.शा. ५/२१)
नारदाद्यैश्च गन्धर्वैः सभायां देवदानवाः।
निर्गीतं श्राविताः सम्यग्लयतालसमन्वितम्॥'' (ना.शा. ५/३२)

एतत्पुराकल्पद्वारेणाह-चित्रेत्यादिना ''बहिर्गीतमिति स्मृतम्।'' इत्यन्तेन श्लोकदशकेन। गीतवाद्योभयप्रधानाः क्रमेण चित्रादयो गीतिमार्गाः। तद्विषयं यत्सप्तरूपं सहोपोहनप्रत्युपोहनैः, निर्गीतेन च ''आश्रावणा तथारम्भः'' इत्यादिना देवस्तुत्या च वाच्यभूतयाऽभितो नन्दितं समृद्धं तस्मिन्प्रवर्तिते प्रयुक्ते सति तद्गानं गीयमानं सुखजनकमपि श्रुत्वा दैत्याः क्षुभिताः। कुतः इत्याह-देवैरहो रम्यं साधु साध्वित्यादिभिः स्तुतिभिरभिनन्द्यमानं यतः। तुरप्यर्थः।

केन वा प्रवर्तितं तदित्याह नारदाद्यैरिति तदधिष्ठितैरित्यर्थः। तदिति सप्तरूपम्। लयो

द्रुतादिः। तालः शम्यादिविशिष्टः त्र्यश्रश्चतुरश्रो मिश्रश्च।

आरम्भे प्रयोजिते गन्धर्वाः तुष्यन्ति–

'तुष्यन्त्यपि च गन्धर्वा आरम्भे सम्प्रयोजिते' (ना.शा. ५/४६)। गीताभिज्ञः गन्धर्वः उदात्तगानकारी इति *नाट्यशास्त्रे* लिखितः।

### ध्रुपदीसंस्कृतसाहित्ये–

महाकवि-कालिदास-प्रणीतस्य *रघुवंश*-महाकाव्यस्य अजस्वयंवराभिगमनं नाम पञ्चमसर्गे प्रियंवदो नाम गन्धर्वस्य उल्लेखः प्राप्यते। गन्धर्वपतिप्रियदर्शनस्य पुत्रः प्रियंवदः मतङ्गस्य नाम ऋषेरभिशापेन तदा एकः आरण्यकः हस्ती संवृतः। नर्मदाजलादुत्थाय स उवाच यत् तं निकषा सम्मोहनो नाम एकं गन्धर्वा*स्त्रमासीत्* यत् सः अजाय ददौ। अस्य अस्त्रस्य एतदेव विशेषत्वम् यत् शत्रोः प्राणनाशम् अकृत्वापि तं जेतुं सक्षमम्। *रघुवंशे* उक्तम्—

"सम्मोहनं नाम सखे! ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम्।
गान्धर्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते॥" (रघु. ५/५७)

भारवि-विरचितस्य *किरातार्जुनीयमिति* महाकाव्यस्य सप्तमसर्गे गन्धर्वस्य उल्लेखः प्राप्यते–

"रामाणामवजितमाल्यसौकुमार्ये सम्प्राप्ते वपुषि सहत्वमातपस्य।
गन्धर्वैरधिगतविस्मयैः प्रतीये कल्याणी विधिषु विचित्रता विधातुः॥"
(किरा. ७/७)

रामाणामिति। माला एव माल्यं तस्य सौकुमार्यम् अवजितं येन तस्मिन् कुसुमात् अपि मनोहरे इत्यर्थः। रामाणां वपुषि आतपस्य। कृद्योगे कर्मणि षष्ठी। सहते इति सहः क्षमः। पचाद्यच्। तस्य भावः सहत्वम्। ततः सम्प्राप्ते सति अधिगतविस्मयैः सम्प्राप्ताश्चर्यैः गन्धर्वैः विधातुः विधिषु सृष्टिसु कल्याणी साध्वी श्रेयसी उपकारकत्वात् इति भावः। विचित्रता नानाविधत्वं प्रतीये अवगता ज्ञाता प्रतिपूर्वात् इणः कर्मणि लिट्।

**(घण्टापथे-श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिकृते)**

बाणभट्टविरचितं कथाकाव्यं *कादम्बरीति*। अस्मिन् कथाकाव्ये लक्ष्यते यत् दक्षप्रजापतेः सुतौ मुनिः अरिष्टा च। ताभ्यां सह गन्धर्वाणां समागमे द्वौ कुलौ जातौ। मुनेः गर्भे चित्ररथः जातः।

देवराजः इन्द्रः चित्ररथस्य प्रभावं कीर्तिं च वर्धयामास, गन्धर्वलोकस्य अधिपतिं च चकार। भारतवर्षस्य उत्तरे किम्पुरुषवर्षे हेमकूट-नाम्नि वर्षपर्वते चित्ररथस्य वासः। तस्याधीने सहस्रं गन्धर्वलोकाः। गन्धर्वाधिपतेः चित्ररथस्य अप्सरसः मदिरायाः च दुहिता कादम्बरी, कथाकाव्यस्य नायिका। अरिष्टायाः पुत्रः जगद्विख्यातः गन्धर्वः हंसः। हंसस्य अप्सरसः गौर्याः च कन्या महाश्वेता, कादम्बर्याः सखी। कादम्बरी महाश्वेता च एकस्माद

गुरोः नृत्य-गीत-वाद्यादिशिक्षां लेभाते।

कथासाहित्यस्य *कथासरित्सागरस्य* रचयिता सोमदेवः। अस्य पञ्चमलम्बकस्य द्वितीयतरङ्गे गन्धर्वस्य उल्लेखः प्राप्यते। उदयन-वासवदत्तयोः पुत्रः नरवाहनदत्तः विद्याधरीद्वारा गन्धर्वपुर्यां कूपमध्ये निमज्जितः। वीणादत्तः नाम एकः गन्धर्वः तम् उद्धरति। तस्यां गन्धर्वपुर्यां सागरदत्तो नाम गन्धर्वाधिपतेः गन्धर्वदत्ता नाम एका तनया आसीत्। सा वीणासहयोगेन सङ्गीते अतीव पारदर्शिनी आसीत्। वीणासहयोगेन उत्तमरूपेण विष्णोः स्तवगाने समर्थं पुरुषं सा पतिरूपेण कामयते। चतुष्पष्ठीकलाविद्यायां पारदर्शी नरवाहनदत्तः गीतपरीक्षायामुत्तीर्णः अभवत्। गन्धर्वदत्तया सह नरवाहनदत्तस्य परिणयः संजातः।

अन्यसाहित्येष्वपि गन्धर्वस्य उल्लेखः प्रभावश्च विद्येते।

## बौद्ध-साहित्ये

बौद्धसाहित्ये गन्धर्वस्य द्विविधः प्रभावः लक्ष्यते। प्रथमतः, ते उपदेवताः, आकाशचारिणः सङ्गीतज्ञाश्च। तेषां नृपः धृतराष्ट्रः। द्वितीयतः, ते मनुष्यजन्मना सह समन्विताः, ते अन्तराभवाः। तैः जन्मान्तरवादः स्वीकृतः। बौद्धसाहित्ये तिम्वारुः पञ्चशिखः मातलिः चेति नाम गन्धर्वाणामुल्लेखः प्राप्यते।



गन्धर्वराजः धृतराष्ट्रः

### जन्मान्तरवादः-

बुद्धदेवेन भिक्षूणां जन्मकारणविषये गन्धर्वाणामुपस्थितिः कथिता। उपस्थितेष्वपि अन्येषु प्रसिद्धकारणेषु जीवस्तावद् न जायते यावत् तत्र गन्धर्वः न उपतिष्ठते। जीवस्य जन्मनि गन्धर्वः निमित्तं भवतीत्यर्थः। *ऋग्वेदस्य* सायणभाष्ये गन्धर्वशब्दस्य गर्भः इति अर्थः स्वीकृतः।

## जैनसाहित्ये

पूर्व-मध्ययुगीय-जैनसाहित्ये विद्याधरेण यक्षेण च सह गन्धर्वस्य कल्पना लक्ष्यते। गन्धर्वविषयको बहुविधो जैनकल्पिताख्यानमाला लक्ष्यते। किम्पुरुषः महोरग इत्यादिभिः देवताभिः सह गन्धर्वाणां कल्पना लक्ष्यते।

## ग्रीकसाहित्ये

ग्रीकसाहित्ये गन्धर्वः कल्पितः जीवविशेषः, यस्य शरीरार्धभागः अश्ववत्। एषां पृथक् नगरमस्ति।

**शिलालेखे**


अजन्ता-गुहाचित्रे अप्सरसा सह गगनचारिगन्धर्वः

अजन्ता-गुहाचित्रे गगनचारिणः गन्धर्वस्य चित्रम् अङ्कितम्। एषां प्रतिमायां मुकुटं नास्ति इति विष्णुधर्मोत्तरपुराणे कथितः। मतुरा-गान्धार-गुप्त-चालुक्य-पल्लवकलाकेन्द्रेषु गन्धर्वस्य प्रतिमा लक्ष्यते।

**विशिष्टाः गन्धर्वाः**

श्रीमद्गुरुनाथ-विद्यानिधि-भट्टाचार्य-महोदयेन *अमरकोषस्य* टीकायामुक्तम्—

''देवतानां हाहाहूहूविश्वावसुतुम्वुरुचित्ररथप्रभृतयो गायनगन्धर्वशब्दवाच्याः।

आद्येन, विश्वावसुश्च गोमायुर्नन्दी चित्ररथस्तथा। भाण्डको नारदश्चैव हंस इत्येवमादयः॥''

इति।


अक्ष्चवद् गन्धर्वः

कुवेरस्य सभायां विश्वावसुः हाहा हूहू तुम्वुरुः पर्वतः

शैलूषः चित्रसेनः चित्ररथप्रभृतयः अतिष्ठन्। उक्तञ्च *महाभारते*-

''प्रहृष्टाः सततञ्चापि बहुशः सपरिच्छदाः।
गन्धर्वाणाञ्च पतयो विश्वावसुर्हहा हुहुः॥
(महा. २/१०/२४)

तुम्वुरुः पर्वतश्चैव शैलूषश्च तथापरः।
चित्रसेनश्च गीतज्ञस्तथा चित्ररथोऽपि च।
एते चान्ये च बहवो धनेश्वरमुपासते॥''
(युग्मकम्) (महा. २/१०/२५)

अर्जुनस्य जन्मसमये हाहा हूहू विश्वावसुः तुम्वुरुः चित्ररथः नारदप्रभृतयः गीतं गीतवन्तः। तुम्वुरुः नारदस्य गुरुरासीत्।

**उपसंहारः**

संस्कृत-बौद्ध-जैनसाहित्ये गन्धर्वः उपदेवतारूपेण चिह्नितः। सर्वत्र गन्धर्वः सङ्गीतैः सह युक्तः। क्वचित् स्थाने गन्धर्वः जीवानां जन्महेतुः इति कथितम्। हिन्दुशास्त्रे मनुस्मृतौ गान्धर्वविवाहः स्वीकृतः यत्र स्त्रीपुरुषौ स्वेच्छया विवाहवन्धने मिलितौ। उक्तञ्च

*मनुसंहितायाम्-*

"इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः॥"

(मनु. ३/३२)



गन्धर्वकन्या गओहरजानः

*रामायणे महाभारते पुराणे* च गन्धर्वः देवगायकरूपेण चित्रितः। भारतीय-ध्रुपदी-संगीतैः सह युक्ताः सङ्गीतज्ञाः आत्मनः गन्धर्वान् कथयन्ति। गन्धर्ववेदः सङ्गीतशास्त्रीयः ग्रन्थः। मार्गसङ्गीते वा ये अभिनयशिल्पैः सह युक्ताः वेदोत्तरमहाकाव्ये ते नटाः भरताः वा नाम्ना परिचिताः। गीतवाद्यैः सह युक्तः गन्धर्वशब्दवाच्या, वेणुवादकः, वांशिकः, वीणावादकः वैणिकः, नर्तक-नर्तकी उर्वस-उर्वसी इति परिचितः। प्राचीन-संगीतशास्त्रेषु गायक-नर्तक-परम्परायाः अन्तिमावस्था 'संगीत-घराने'ति कथ्यते। एवं संगीतं विनोदनस्य मनोरञ्जनस्य उपकरणम् वा। ध्रुपद्-खेयाल-टप्पा-ठुम्री-वीणादयः सम्प्रदायाः उल्लिखिताः। सुरदास-भवानी-दीनदयारामउस्तादः-रामप्रसादः-गौहरजान-प्रमुखाः उल्लेखयोग्याः शिल्पिनः।

## परिशीलिता ग्रन्थानुक्रमणी

### संस्कृत-ग्रन्थाः


अमरसिंहः, *नामलिङ्गानुशासनम्,* सम्पादकः-ड. एन्.जि. सर्देशाइ, डि.जे. उपाध्यायः, पुना,ओरियेण्टल वुक एजेन्सि,१९४०।

बाणभट्टः, *कादम्बरी* (पूर्वभागः-वङ्गानुवादसमेता), सम्पादकः-हरिदास-सिद्धान्तवागीशः (चतुर्थ-संस्करणम्), कोलकाता, १८७२.

भारविः, *किरातार्ज्जुनीयम्,* सम्पादकः-गुरुनाथविद्यानिधि-भट्टाचार्यः, कलकत्ता, १३५३ वङ्गाब्दः।

श्रीकृष्णद्वैपायनवेदव्यासः, *महाभारतम्,* आदिपर्व्व-१, अनुवादकः-
हरिदाससिद्धान्तवागीशभट्टाचार्यः, विश्ववाणी प्रकाशनी, कलिकाता, १३८३ वङ्गाब्दः

श्रीकृष्णद्वैपायनवेदव्यासः, *महाभारतम्,* सभापर्व्व-५, अनुवादकः-
हरिदाससिद्धान्तवागीशभट्टाचार्यः, विश्ववाणी प्रकाशनी, कलिकाता, १३८४ वङ्गाब्दः

श्रीकृष्णद्वैपायनवेदव्यासः, *महाभारतम्,* वनपर्व्वः-६, अनुवादकः-

हरिदाससिद्धान्तवागीशभट्टाचार्य:, विश्ववाणी प्रकाशनी, कलिकाता, १३८४ वङ्गाब्द:
श्रीकृष्णद्वैपायनवेदव्यास:, *महाभारतम्,* वनपर्व्व–७, अनुवादक:–
हरिदाससिद्धान्तवागीशभट्टाचार्य:, विश्ववाणी प्रकाशनी, कलिकाता, १३८४ वङ्गाब्द:
श्रीकृष्णद्वैपायनवेदव्यास:, *महाभारतम्,* उद् योगपर्व्व–१३, अनुवादक:–
हरिदाससिद्धान्तवागीशभट्टाचार्य:, विश्ववाणी प्रकाशनी, कलिकाता, १३८५ वङ्गाब्द:
श्रीकृष्णद्वैपायनवेदव्यास:, *महाभारतम्,* उद्योगपर्व्व–१६, अनुवादक:–
हरिदाससिद्धान्तवागीशभट्टाचार्य:, विश्ववाणी प्रकाशनी, कलिकाता, १३८६ वङ्गाब्द:
*श्रीमद्भगवद्गीता,* सम्पादक:–प्रमथनाथतर्कभूषण:, देव साहित्य कुटीर प्राइभेट लिमिटेड, कलिकाता,२०१३

**वङ्गीयग्रन्था:–**

*কাদম্বরী,* অনুবাদক-তারাশঙ্কর তর্করত্ন, সম্পা.-আশুতোষ ভট্টাচার্য, কলিকাতা, ১৩৬৭ বঙ্গাব্দ
*কথাসরিৎসাগর,* সোমদেব ভট্ট, অনু.-হীরেন্দ্রলাল বিশ্বাস, অ্যাকাডেমিক পাবলিশার্স, কলিকাতা, ১৯৮১
দেব, আশুতোষ, *শব্দবোধ অভিধান,* দেবসাহিত্য কুটীর, কলকাতা, ২০১০
দেব, রাধাকান্ত, *শব্দকল্পদ্রুমঃ,* সম্পা.-কালীপ্রসন্ন শর্মা, কলিকাতা, ১৮৩৬ শকাব্দ
বন্দ্যোপাধ্যায়, হরিচরণ, *বঙ্গীয় শব্দকোষ* (প্রথম খণ্ড—অ -ন), সাহিত্য অকাদেমী, নিউ দিল্লী, ১৯৬৬
বসু, রাজশেখর, *চলন্তিকা-আধুনিক বঙ্গভাষার অভিধান,* এম.সি.সরকার অ্যাণ্ড সন্স প্রাইভেট লিঃ, ১৪১৬ বঙ্গাব্দ
বিদ্যারত্ন গিরিশচন্দ্র, *শব্দসার-সংস্কৃত বাঙ্গালা অভিধান,* সংস্কৃত পুস্তক ভাণ্ডার, কোলকাতা, ২০০৩
বিদ্যালঙ্কার, শশীভুষণ, সদেশ *পৌরাণিক অভিধান (প্রথম খণ্ড),* সম্পা.-নিমাইচন্দ্র পাল, কলকাতা, ১৪১৩ বঙ্গাব্দ
বিশ্বাস, শৈলেন্দ্র, *সংসদ বাংলা অভিধান,* সাহিত্য সংসদ, কলকাতা, ২০১০
*ব্রহ্মাণ্ড পুরাণ,* সম্পা.-গৌরীনাথ শাস্ত্রী, নবপত্র প্রকাশন, ১৯৮৯
ভরত *নাট্যশাস্ত্র* (প্রথম ভাগ), সম্পা.-সুরেশচন্দ্র বন্দ্যোপাধ্যায়, নবপত্র প্রকাশন, কলিকাতা, ২০১৪
ভট্টাচার্য্য, গুরুনাথ বিদ্যানিধি, *অমরকোষ* বা *অমরার্থচন্দ্রিকা,* সংস্কৃত পুস্তক ভাণ্ডার,

কলিকাতা, ১৯৮৮

মিত্র, সুবলচন্দ্র, *সরল বাঙ্গালা অভিধান,* নিউ বেঙ্গল প্রেস (প্রাঃ) লিঃ, কলিকাতা, ২০০২

সরকার, সুধীরচন্দ্র, *পৌরাণিক অভিধান,* এম.সি. সরকার অ্যাণ্ড সন্স প্রাইভেট লিঃ, কলিকাতা, ১৩৬৫ বঙ্গাব্দ

সিংহ, উমানাথ, *গন্ধর্বকন্যা গওহরজান,* মিত্র ও ঘোষ পাবলিশার্স, কলিকাতা, ১৯৮৩

**हिन्दि ग्रन्थः-**

त्रिपाठी, ब्रह्मानन्द, *कालिदास-ग्रन्थावली,* चौखाम्बा सुरभारती प्रकाशन, वाराणसी, 2014

**आङ्गल-ग्रन्थाः-**

Amarasimha, ***The Nāmaliṅganuśāsana (Amarakosha),*** with the commentary of Kshirasvamin. Ed. Krishnaji Govind Oka. Poona, 1913.

Apte, Vaman Shivaram, ***The Student's Sanskrit English Dictionary,*** Rashtriya Sanskrit Sansthan, New Delhi, 1987.

Monier-Williams, Monier, ***A Sanskrit-English Dictionary,*** Motilal Banarsidass, Delhi, 1986

Mukhopadhyaya, Govindagopal, ***A Tri-lingual Dictionary,*** Sanskrit College, Calcutta (Now Kolkata), 1966.

***Rāmāyaṇa of Valmiki,*** Trans, by M. N. Dutt, Ed. Dr. Ravi Prakash Arya, Parimal Publications (Vol-IV), Delhi, 2004

Saklani, Dinesh Prasad, ***Ancient Communities of the Himalaya,*** Indus Publishing Company, New Delhi, 1988.

Sorensen, S. ***An Index to the names in the Mahabharata,*** Motilal Banarsidass, New Delhi, 1963.

***The Śatapatha-Brāhmaṇa,*** Maitreyee Deshpande, Trans. by Julius Eggeling. New Bharatiya Book Corporation (Vol.III-Kanada VI-X), Delhi, 2008.

***Viṣṇu Purāṇa, G***ita Press, Gorakhpur, Trnas by Wilosn (5 Vols.), London, 1864.

पत्रिका-

Wayman, Alex, ***The Vedic Gandharva and Rebirth Theory,*** Bhandarkar Oriental Research Institute, Pune,1997.

आन्तर्जालिक-पत्रिकाः-

**Gandharva-Wilipedia.** Url.https://en.Wikipedia.org./wiki/Gandharva. Retrieved on-14.05.2023

**Gandharvas-Mahavidya.** Url.https://www.mahavidya.ca>2017/12/27>gand.Retrieved on-14.05.2023

**Gandharva-New World Encyclopedia.** Url.https://www.newworldenclopedia.org/entry/Gandharva.Retrieved on-14.05.2023

**Gandharva-Wilipedia.** Url.https://www.wikimedia.org>wiki>Gandharva. Retrieved on-11.04.2023

**Gandharva-Wilipedia.** Url.https://en.m.wikipedia.org>wiki>Gandharva.Retrieved on-11.04.2023

**Gandharva-** Url.https://www.Chandrakantha.com>wiki>Gandharva.Retrieved on-11.04.2023

**Apsaras and Gandharva-**Ancient History

Encyclopedia.Url.https://www.ancient.eu>Apsaras andGandharvas.Retrieved on-11.04.2023

**Jayarava's Raves : Gandharva and the Buddhist Afterlife.**

Part.-I. jayarava.blogspot.com>2015.01>gandharva.Retrieved on-05.04.2023

**Untitled Document**-Url.https://www.abasar.net/unimahabharat/gondhorb.htm.Retrieved on-05.04.2023

**Haha and Huhu : Famous Musicians! Speakng Tree:-**Url.https://www.speakingtree.in>blog. Retrieved on-05.04.2023

गन्धर्वः- onushilon.org>myth>hindu>gondhar. Retrieved on-06.04.2023

गन्धर्वः- Url.https://www.ebanglalibrary.com. Retrieved on-11.04.2023

गन्धर्वः- www.abasar.net>gondhorb. Retrieved on-11.04.2023

गन्धर्व आर शालभञ्जिकाः- www.abasar.net>music-shibangshu. Retrieved on-11.06.2023

पाखोयाज घरनारा उऽपत्ति ओा आलोचनाः Shodhganga.inflibnet.ac.in>bitstream. Retrievedc on-11.06.2023.

गंधर्व-भारतकोश, ज्ञान का हिन्दी महासागरः-m.bharatdiscovery.org>india> Retrieved on-11.04.2023

# अनुप्रासालोके *श्रीकृष्णाह्निक-कौमुदी*काव्यम्


## मृत्युञ्जयसेनः



**सारसंक्षेपः** *श्रीकृष्णाह्निककौमुदी*काव्यस्य रचयिता कविकर्णपूरगोस्वामी। तस्य प्रकृतनाम परमानन्ददासः। *कृष्णाह्निककौमुदी*काव्ये षट्प्रकाशाः सन्ति। यत्र अष्टकालीनकृष्णलीलास्मरणस्य पद्धतयः वर्णिताः सन्ति। अष्टकालीन-लीलाः हि- निशान्तलीला, प्रातःलीला, पूर्वाह्नलीला, मध्याह्नलीला, अपराह्नलीला, सायंकालीनलीला, प्रदोषलीला, नैशलीला चेति। लीलावर्णनायां कविना प्रत्येकेषु श्लोकेषु अनुप्रासस्य अपूर्वप्रयोगो विहितः। काव्येऽस्मिन् प्रयोगदृष्ट्या अनुप्रासालंकारस्य विशेषतया विचारः मदीये प्रबन्धे करिष्यते।



**कूटशब्दाः** अलङ्कारः, अन्त्यानुप्रासः, छेकानुप्रासः, वृत्त्यनुप्रासः।


श्रीकृष्णस्य अष्टकालीनलीलाविषयककाव्यत्वेन *श्रीकृष्णाह्निककौमुदी* इत्यस्य प्रसिद्धिः वर्तते। काव्यमेतत् कविकर्णपूरगौस्वामिना विरचितम्। काव्येऽस्मिन् निशान्तलीलायां राधाकृष्णयोः रासलीलावर्णनं, प्रातःलीलावर्णनायां प्रसाधनद्रव्याणां वर्णनं, नन्दालये श्रीराधायाः रन्धनस्य वर्णनं, मध्याह्नलीलायां गोपिभिः सह वाग्विलासः, विहारः, जलकेलिः, अपराह्नलीलायां श्रीकृष्णस्य शोभा, वंशीध्वनिना च सर्वेषां प्रेमविकारभावः, सान्ध्यलीलायां श्रीकृष्णेण गोचारणम्, चन्द्रोदयः प्रभृतीनां विषयाणां वर्णनम् अस्ति। प्रदोषलीलायां योगमायया गोपीनां ज्योत्स्नाभिसारः, नैशलीलायां मधुपानोत्सवस्य वर्णना, सखीनां भावविह्वलतायाः वर्णना, तथा च गीताभिनयादिभिः कामपूर्णोत्सवस्य सम्पादनं प्रभृतिविषयाः अतीव रमणीयतया चित्ताकर्षरूपेण च प्रस्फुटिताः सन्ति।

षट्प्रकाशसमन्वितेऽस्मिन् ग्रन्थे ७०५ संख्यकाः श्लोकाः सन्ति। कविकर्णपूरेण काव्येऽस्मिन् प्रतिप्रकाशं पृथक् पृथक् छन्दसा विरचितं, किञ्च प्रत्येकेषु प्रकाशेषु सर्वेषु श्लोकेषु शब्दालङ्कारत्वेन अन्त्यानुप्रासालंकारः प्रयुक्तोऽस्ति। टीकाकारेण हरिदासदासेन काव्यस्यास्य अलङ्कारनिरूपणावसरे भूमिकायां प्रोक्तम्-*अत्र अन्त्यानुप्रासेन सह पादमध्यान्तानुप्रासोऽपि उल्लिखितः* इति।

काव्यस्य प्रथमप्रकाशे मालिनीछन्दः, द्वितीयप्रकाशे वसन्ततिलकच्छन्दः तृतीयप्रकाशे

शार्दूलविक्रीडितम्, चतुर्थे स्वागता, पञ्चमे पुष्पिताग्रा, षष्ठप्रकाशे मन्दाक्रान्ताछन्दः च विद्यन्ते। काव्येऽस्मिन् कविकर्णपूरेण भक्तिरसः अङ्गिरसत्वेन गृहीतः। कस्यचित् ग्रन्थस्य प्रवृत्तेः प्रयोजको भवति अनुबन्धज्ञानमित्यत्र नास्ति कश्चन संशयः। तत्रापि प्रयोजनं खलु मुख्यम्। यतोहि *प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते* इति लोकवचनम् अस्ति। अस्य काव्यस्य प्रयोजनं तावत् प्रेम। प्रयोजनसाधनाय श्रवण–कीर्तन–स्मरणादयः नवधा भक्तयः स्वीकृताः। अहोर्निशं मुहूर्तकमपि कृष्णं विना न स्थातव्यमित्येव काव्येनानेन ध्वन्यते। वस्तुतः कविकर्णपूरेण श्रीकृष्णलीलास्मरणाय काव्यमिदं प्रणीतमिति निश्चयेन वक्तुं पार्यते।

श्रीरूपगोस्वामिकृतेन अष्टकालीनलीलाविषयकेन स्मरणमङ्गलस्तोत्रग्रन्थेन कविकर्णपूरस्य इयं रचना प्रभाविता आसीदिति ग्रन्थस्य विषयेण अवबुध्यते। काव्यस्यास्य एका टीका प्राप्यते,या खलु वैष्णवाचार्येण हरिदासदासेन विरचिता। अलंकारविषये वामनाचार्येण स्वीयग्रन्थे *काव्यालंकारसूत्रवृत्तौ* कथितं यत्— *सौन्दर्यमलङ्कारः*।[1] अर्थात् तेन सौन्दर्यमेव अलङ्काररूपेण कथितम्। आचार्यवामनेन अलंकारशब्दः द्विधा विभक्तः। यथा—भाववाच्येन निष्पन्नः अर्थः–*अलङ्कृतिरलङ्कारः*।[2] अस्यार्थः भवति सौन्दर्यविधायकः धर्मः एव अलंकारः। अपरः अर्थः करणवाच्ये निष्पन्नः–*अलङ्क्रियतेऽनेन*[3] इति। अर्थात् येन अलंकरणं क्रियते। अत्र अलंकारेण अनुप्रासयमकरूपकोपमादयः बोद्धव्याः। आचार्यविश्वनाथेन अलंकारविषये उक्तं यत्–

*शब्दार्थयोरस्थिराः ये धर्माः शोभातिशायिनः।*
*रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्*।[4]

अर्थात् काव्यस्य अतिशायिनः शोभावर्धकः, रसादीनाम् उत्कर्षसाधकः तथा च शब्दार्थयोः यो अस्थायिधर्मः सोऽलङ्कारः इति कथितः। यथा अङ्गदादयः मानवशरीरस्य सौन्दर्यविधायकाः तथैव काव्यस्य अलंकाराः। शब्दार्थयोः सहयोगेन काव्यदेहस्य शोभावर्धकाः अनुप्रासोपमादयः अलंकाराः काव्यस्य अस्थायिनः धर्माः इत्युच्यन्ते, यतः काव्ये गुणादीनां स्थितिरिव अलंकाराः अपि अनावश्यकाः एव। विविधैरालंकारिकैरलंकारः द्विविधः इति प्रोक्तः शब्दालंकारः अर्थालंकारश्च। किन्तु बहुभिरालंकारिकैः उभयालंकाररूपेण अपरोऽपि भेदः स्वीकृतः।

---

1 *काव्यालंकारसूत्रवृत्तिः*– १/१/२

2 तदेव, पृ–६

3 तत्रैव

4 *साहित्यदर्पणः* – १०/१

5 *काव्यप्रकाशः* पृ–४

प्रकृष्टरूपेण न्यसनं स्थापनं वा अनुप्रास इति उच्यते।[5] अनुप्रासशब्दस्य व्युत्पत्तिः भवति अनु-प्र + आस इति। अनुपदस्यार्थः भवति रसादीनाम् अनुगतः। आचार्यविश्वनाथेन तस्य साहित्यदर्पणग्रन्थे अनुप्रासालंकारविषये उक्तं—*अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।*[6] अर्थात् यदि स्वरवर्णस्य वैषम्योऽपि भवति तथापि व्यञ्जनानां सादृश्यतया आवृत्तिः भवति चेत् अनुप्रासः अलंकारः भवति। अनुप्रासः अलंकारः पञ्चविधः- छेकानुप्रासः, वृत्त्यनुप्रासः, श्रुत्यनुप्रासः, अन्त्यानुप्रासः लाटानुप्रासश्च।[7]

कविकर्णपूरेण स्वीयग्रन्थे *अलङ्कारकौस्तुभे* कथितं—यस्मिन् अलंकारे सजातीयवर्णमनु सजातीयवर्णान्तरस्य स्थापनं भवति सोऽलङ्कारः अनुप्रासः स्यात्। तन्मते अनुप्रासः द्विविधः- छेकानुप्रासः वृत्त्यनुप्रासश्च।[8] तेन लाटानुप्रासोऽपि स्वीकृतः।

आचार्यविश्वनाथस्य मते बहुव्यञ्जनानां सकृत् उच्चारणसादृश्यं छेकानुप्रासः इति कथ्यते।[9] स्वरूपानुसारेण अनेकव्यञ्जनानां पुनः पुनः आवृत्तिः वृत्त्यनुप्रासः अलङ्कारः इति उच्यते।[10] दन्ततालव्यादिषु स्थानेषु एकस्मिन् स्थाने उच्चारणात् एकस्यैव व्यञ्जनस्य आवृत्तिः भवति श्रुत्यनुप्रासः अलङ्कारः।[11] यस्मिन् अनुप्रासे द्वयोः अर्थयोः तात्पर्ये भिन्नेऽपि शब्दार्थयोः पुनरुक्तिः भवति सः लाटानुप्रासरूपेण कथितः।[12] अन्त्यानुप्रासप्रसङ्गे विश्वनाथकविराजेनोक्तं यत्—

*व्यञ्जनं चेद् यथावस्थं सहाद्येन स्वरेण तु।*
*आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत्।।*[13]

यदि पदस्य पादस्य वान्ते स्थितः व्यञ्जनवर्णः तस्य अव्यवहितेन पूर्वस्वरेण सह तथा अनुस्वारः, विसर्गः, स्वरवर्णः युक्ताक्षरः इत्यादिभिः सह संयुक्तरूपेण उच्चारणादनन्तरं पुनः तद्वदेव उच्चार्यन्ते तदा अन्त्यानुप्रासः अलंकारः भवति। पदशब्देन सुबन्तं तिङन्तं च उच्येते। पदान्ते पादान्ते वा विद्यमानत्वात् अयमं अनुप्रासः अन्त्यानुप्रास इत्युच्यते। श्रीकृष्णाह्निककौमुद्याः षट्प्रकाशेषु अन्त्यानुप्रासः अलङ्कारः परिलक्ष्यते।

प्रथमे प्रकाशे राधाकृष्णयोः निशान्तलीलायाः वर्णनायां श्रीराधायाः जागरणप्रसङ्गे कविना पादमध्यान्त्यानुप्रासः अलंकारः प्रयुक्तः।

---

6 *साहित्यदर्पणः* - १०/३
7 तदेव - १०/९
8 *अलंकारकौस्तुभः*- ७/११६-१९७
9 *साहित्यदर्पणः* - १०/४
10 तदेव - १०/५
11 तदेव - १०/६
12 तदेव - १०/८
13 तदेव - १०/७

*व्रजपति-तनयाङ्कासङ्गतो वीतशङ्का*
*विधुमुखि! किमु शेषे निर्भरं रात्रिशेषे।*
*प्रमद-मधुपपुञ्जे मा परं तिष्ठ कुञ्जे*
*न गणयसि विगर्हां किं गुरुणामनर्हाम्।*[14]

उक्तश्लोकस्य प्रथमे चरणे 'ब्रजपतितनयाङ्का' अर्थात् ब्रजपतितनय + अङ्का तथा च पादान्ते अस्ति 'वीतशङ्का' अर्थात् वितश् + अङ्का। द्वितीयपादस्य मध्ये विद्यते 'किमु शेषे' अर्थात् श् + एषे, अन्ते च 'रात्रि शेषे' पदद्वयमस्ति, अर्थात् पदविभागेन श् + एषे इति भवति। अनेनैव तृतीयपादस्य मध्ये 'पुञ्जे' अन्ते च 'कुञ्जे' इति शब्दद्वयं विद्यते। अर्थात् 'उञ्जे' इति संयुक्तवर्णः अस्ति। चतुर्थे चरणे 'विगर्हाम् अन्ते च 'गुरुणामनर्हाम्' अर्थात् 'अर्हाम्' पदस्य आवृत्तिः भवति। उक्तश्लोकस्य पादचतुष्टयेष्वेव सस्वरव्यञ्जनवर्णाः मध्ये अन्ते च विद्यन्ते। अतः पादमध्यान्त्यानुप्रासः अलंकारः भवति।

अस्य अलङ्कारस्य उदाहरणरूपेण अपरः श्लोकः यथा-

*स्मितकमलमुखीनां मण्डली ते सखीनां*
*मिलति परमहृष्टा स्वस्वगेहादभीष्टा।*
*सुमुखि! विगतदोषे या किल त्वां प्रदोषे*
*निविरतिमिर-पुञ्जं प्रापयत् केलिकुञ्जम्॥*[15]

उक्तश्लोकस्य प्रथमपादे 'स्मितकमलमुखीनाम्' इत्यत्रा 'ईनाम्' इति शव्दः अस्ति, तथा च प्रथमपादस्य अन्तेऽपि 'सखीनाम्' इत्यत्रं 'ईनाम्' इति शव्दः विद्यते। द्वितीयपादस्य मध्ये 'परमहृष्टा' अन्ते च 'स्वस्वगेहादभीष्टा' अर्थात् 'ष्टा' इति उभयत्र एव विद्यते। तृतीयपादे 'विगतदोषे' अर्थात् 'अदोषे' तृतीयपादस्य अन्ते 'प्रदोषे' इति पदाच्च 'अदोषे' उभयत्र एव वर्तते। चतुर्थपादस्य मध्ये 'निविरतिमिरपुञ्जम्', अन्ते च 'केलिकुञ्जम्' इति शब्दौ स्तः। अर्थात् 'उञ्जम्' इति उभयत्र वर्तते। अतः उक्ते श्लोके पादमध्यान्त्यानुप्रासः अलंकारः अस्ति। एवमेव प्रथमप्रकाशस्य प्रत्येकस्मिन् श्लोके अयमलंकारः अवलोक्यते। द्वितीये प्रकाशे प्रातःलीलावर्णनायां मातायशोदया श्रीकृष्णस्य जागरणप्रसङ्गे अन्त्यानुप्रासालंकारः दृश्यते।

*उत्तिष्ठ तात रजनीयमगाद् विरामं*
*पश्यांशुमन्तमुदयोद्यमनाभिरामं।*
*प्रत्यूष-सेवन-विधौ विलसद्-विलासाः*
*शय्यालयं तव विशन्ति कुमारदासाः॥*[16]

---

14 *श्रीश्रीकृष्णाह्निक-कौमुदी - १/३*

15 तदेव - १/८

16 तदेव - २/२

अस्मिन् श्लोके प्रथमचरणस्य अन्तिमे विरामं (व् + इरामं) तथा च द्वितीयपादस्य अन्तिमे अभिरामं (अभ् + इरामं) इति पदमस्ति। उभयत्र एव पादान्ते इरामम् इति वर्णसमष्टिविशेषः विद्यते। अर्थात् इ-कारेण सह राममित्यस्य आवृत्तिः भवति। अनेनैव तृतीयपादस्य अन्ते विलासाः (विल् + आसाः) पदमस्ति, चतुर्थपादस्यान्ते च कुमारदासाः (कुमारद् + आसाः) पदं विद्यते। अर्थात् उभयस्थाने एव विसर्गेण सह स इति वर्णः आकारश्च विद्यते। द्वितीयप्रकाशस्य प्रत्येकेषु श्लोकेष्वेव अयमलंकारः परिलक्ष्यते। तृतीयप्रकाशे प्रातःलीलायां श्रीकृष्णस्य भोजनवर्णनाप्रसङ्गे कविः अपूर्वकौशलेन अन्त्यानुप्रासस्य प्रयोगं प्रदत्तवान्। यथा-

*सौवर्णीं तल-पात्रिकां घृतपुटीलिम्पाक-खण्डादिभिः*
*सन्धानार्द्ररसालखण्ड-सहितैः सत्कासमर्द्दादिभिः।*
*युक्तां दक्षिणतो निधाय निकटे तस्याश्च भृङ्गारकान्*
*कर्पूरेण सुवासितेन पयसा पूर्णान् व्यधात् कानकान्॥*[17]

उक्तश्लोकस्य प्रथमपादान्ते खण्डादिभिः (खण्ड् + आदिभिः) पदमस्ति द्वितीयपादस्य च अन्तिमे सत्कासमर्द्दादिभिः (सत्कासमर्द्द् + आदिभिः) पदमस्ति। उभयत्र एव सविसर्गौ व्यंजनवर्णौ अर्थात् दिभिः अस्ति, तस्य च प्राक् अ इति स्वरवर्णः विद्यते। उभयस्थाने पादान्ते विद्यमानत्वादत्र अनुप्रासः। तथा च तृतीयपादस्यान्ते भृङ्गारकान् (भृङ्गार् + अकान्) इति पदं चतुर्थपादस्य अन्ते च 'कानकान्' (कान् + अकान्) इति पदं विद्यते। अर्थात् अत्र उभयस्थाने एव 'कान्' इति पदमस्ति, तस्य च प्राक् 'अ'कारः वर्तते। अतः अन्त्यानुप्रासः अलंकारः भवति। अनेनैव तृतीयप्रकाशस्य प्रत्येकेषु श्लोकेषु अयमलंकारः परिलक्ष्यते।

चतुर्थप्रकाशे मध्याह्नलीलावर्णने अन्त्यानुप्रासस्य प्रयोगसौन्दर्यं दृश्यते। यथा-

*तं वसन्तसुभगं वनभागं*
*भागधेय-विलसत्परभागम्।*
*पाप-तापहरण-व्यवसायः*
*सायति स्वरितवेणु-सहायः॥*[18]

उक्तश्लोकस्य प्रथमपादस्यान्ते वनभागं (वन् + अभागं) इति पदमस्ति, द्वितीयपादस्य च अन्ते परभागं (पर् + अभागं) इति पदमस्ति। अत्र पादद्वये 'अभागं' इति वर्णसमष्टिः विद्यते। एवमेव तृतीयपादस्यान्ते व्यवसायः (व्यवस् + आयः) इति पदं चतुर्थपादस्य

---

17 तदेव - ३/३

18 तदेव - ४/१

अन्ते 'सहायः' (सह् + आयः) इति पदञ्च परिलक्ष्येते अर्थात् पादद्वये 'यः' वर्णः अस्ति तथा च तत्पूर्वम् 'आकारः' विद्यते। अतः अन्त्यानुप्रासालंकारः अस्ति। अस्य प्रकाशस्य सर्वस्मिन् श्लोके अन्त्यानुप्रासालंकारः दृश्यते।

पञ्चमे प्रकाशे अपराह्णलीलायाः तथा सायाह्नलीलायाः वर्णनायाम् अन्त्यानुप्रासस्य प्रयोगः दृश्यते–

*परिचरितमथो कुमारभृत्यैः*
*कुशलतया प्रतिकृत्य-क्लिप्त-नृत्यैः।*
*तमनुचरचया निरीक्ष्य कामं*
*प्रमुमुदिरे मुदिरोदराभिरामम्॥*[19]

अस्य श्लोकस्य प्रथमपादस्य अन्ते कुमारभृत्यैः (कुमारभ् + ऋत्यैः) इति तथा च द्वितीयपादान्ते नृत्यैः (न् + ऋत्यैः) इति पदौ स्तः। उभयत्र एव अन्तिमे त्यैः इति युक्तव्यञ्जनम् अस्ति, तत्पूर्वे च ऋकारः विद्यते। एवमेव तृतीयपादान्ते कामं (क् + आमं) पदमस्ति, चतुर्थपादान्ते च मुदिरोदराभिरामम् (मुदिरोदराभिर् + आमम्) इति पदं विद्यते। अर्थात् उभयस्थाने एव पादान्ते सानुस्वारः मवर्णः अस्ति, तत्पूर्वे च अकारः विद्यते। चरणद्वये एव समस्वरेण सह सानुस्वारवर्णस्य आवृत्तिः भवति, अतः अत्र अन्त्यानुप्रासः अस्ति। अनेनैव अस्य प्रकाशस्य सर्वेषु श्लोकेषु अन्त्यानुप्रासः अलंकारः दृश्यते।

षष्ठे प्रकाशे प्रदोषलीलायाः नैशलीलायाः च वर्णने अन्त्यानुप्रासस्य प्रयोगः दृश्यते–

*अध्यारूढः शयनभवनालिन्दमालम्बमानैः*
*पार्श्वद्वन्द्वं शिशुभिरभिरतो दास-दासीप्रधानैः।*
*तामालोक्य श्रियमनुपमां साधु माधुर्य्यधुर्य्यां*
*मेने योग्यां निजविहरणे या भवत्तत्र पूर्य्याम्॥*[20]

अस्मिन् श्लोके प्रथमपादस्य अन्ते 'शयनभवनालिन्दमालम्बमानैः' द्वितीयपादस्य अन्ते च 'दास-दासीप्रधानैः'इति पदौ स्तः, तर्हि उभयत्र एव पादान्ते नैः इति वर्णः विद्यते, तत्पूर्वे च आकारः अस्ति। अतः वर्णसाम्यादत्र अन्त्यानुप्रासः अलंकारः भवति। एवमेव तृतीयपादस्य अन्ते 'माधुर्य्यधुर्य्यां' चतुर्थपादस्य अन्ते च 'पुर्य्याम्' इति पदद्वयम् विद्यते। अर्थात् अत्रापि 'य्याम्' इति सानुस्वारवर्णस्य प्रयोगः अस्ति, तत्पूर्वे च उकारस्य प्रयोगः भवति, अतः श्लोकेऽस्मिन् अन्त्यानुप्रासः अलंकारः अस्ति। अन्त्यानुप्रासालंकारः अस्मिन् प्रकाशे सर्वस्मिन् श्लोके एव दृश्यते। अस्य काव्यस्य श्लोकेषु छेकानुप्रासः, वृत्त्यनुप्रासः, आद्यन्त्यानुप्रासः च अलंकाराः अपि परिलक्ष्यन्ते।

---

19 तदेव – ५/१

20 तदेव – ६/१

**छेकानुप्रासः**—विश्वनाथाचार्येण तस्य *साहित्यदर्पणग्रन्थे* अस्य अनुप्रासस्य लक्षणप्रसङ्गे कथितम्—*छेको व्यञ्जनसङ्घस्य सकृत् साम्यमनेकधा।*[21] अर्थात् बहुव्यञ्जनानां स्वरूपतः क्रमतः वा एकवारं साम्यमेव छेकानुप्रासालंकारः स्यात्।

*सरसि सरसि सारसादि पाथ-*
*श्चरपतग-प्रकरैरसेवि नाथः।*
*पथि पथि परितः प्रयाण-भाग्भिः*
*सकरुण-वाष्प-भरेण रुद्धवाग्भिः॥*[22]

अस्य श्लोकस्य प्रथमचरणे स, र, स वर्णाः क्रमेण असकृत्साम्येन विद्यन्ते। अतः प्रथमचरणे वृत्त्यनुप्रासः अलंकारः भवति। पुनश्च द्वितीये चरणे पथि पदं स्वरूपतः क्रमतश्च सकृत्साम्येन उच्चार्यते। अतः छेकानुप्रासोऽपि भवति।

**वृत्त्यनुप्रासः**-अस्य अलंकारस्य लक्षणप्रसङ्गे आचार्यविश्वनाथेन उक्तम्-

*अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा।*
*एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते॥*[23]

अर्थात् अनेकानां व्यञ्जनानां स्वरूपतः, क्रमतः, उभयरूपेण वा पुनः पुनः आवृत्तिः वृत्त्यनुप्रास इति कथ्यते।

*इति परिणतिमाप तस्य पित्रा*
*सह चरमाशनमाधुरी विचित्रा।*
*पितुरपि परितोष-पोषपूर्णे*
*मनसि मुदां निकरः समाजुधुर्णे॥*[24]

श्लोकेऽस्मिन् प्रथमचरणे त, प, वर्णौ, तृतीयचरणे पवर्णः, चतुर्थचरणे मकारस्य असकृत्साम्यात् वृत्त्यनुप्रासः अलंकारः भवति।

अस्मिन् काव्ये बहुषु श्लोकेषु अन्त्यानुप्रासवत् आदौ अपि अनुप्रासः दृश्यते। यथा-

*द्वौ कलारस-कलाप-विदग्धौ*
*द्वौ पुरु-प्रणयकौशल-मुग्धौ।*
*द्वौ सुमङ्गल-गुणावलि नद्धौ*
*द्वौ सुमङ्गल-मनोरथ-सिद्धौ॥*[25]

उक्तश्लोके चरणचतुष्टयेष्वेव आदौ 'द्वौ' इति पकार्थविशिष्टपदस्य साम्यात् अनुप्रासः

---

21 *साहित्यदर्पण* - १०/४
22 *श्रीश्रीकृष्णाह्निक-कौमुदी* - ५/१९
23 *साहित्यदर्पण* - १०/५
24 *तदेव* - ५/७०
25 तदेव - ४/२९६

भवति, तथा च प्रथम–द्वितीयचरणयोः अन्ते 'ग्धौ' इति संयुक्तवर्णः अस्ति, तृतीय–चतुर्थचरणयोः अन्ते 'द्धौ' इति वर्णसमष्टिः विद्यते। अतः श्लोकस्यास्य आद्यन्ते वर्णसाम्यादत्र आदौ तथा चान्ते अनुप्रासः अलंकारः स्यात्।

*यत्र चित्रहरिणा विहरन्ते*
*यत्र चित्रपतंगा विकवन्ते।*
*यत्र चित्रतरवः सुखयन्ते*
*यत्र चित्रलतिकाश्च रमन्ते॥*[26]

अस्य श्लोकस्यापि आदावन्ते च वर्णसाम्यात् आदौ अन्ते च अनुप्रासः अलंकारः स्यात्।

*श्रीकृष्णाह्निक–कौमुदीकाव्यम्* कविकर्णपूरस्य अनन्यसृष्टिः। अस्य ग्रन्थस्य पठनात् श्रीराधाकृष्ण लीलारसास्वादनेन सह कविकर्णपूरस्य छन्दालंकारादिषु निपुणता अपि परिलक्ष्यते। असाधारणप्रतिभया विशेषरूपेण एकस्मिन् प्रकाशे एकमेव छन्दस्तथा सम्पूर्णे काव्ये सर्वस्मिन् श्लोके अन्त्यानुप्रासालंकारञ्च प्रयुक्तवान्। कविना ग्रन्थेऽस्मिन् न केवलं अनुप्रासः प्रयुक्तः, अपि तु शब्दालंकारत्वेन काकुवक्रोक्तिः[27] तथा अर्थालंकारत्वेन उपमा[28], उत्प्रेक्षा[29], तद्गुणः[30], भ्रान्तिमानः[31], चकितालंकारः[32], परिवृत्तिः[33] इत्यादीनाम् अलंकाराणां प्रयोगेऽपि कवेः असाधारणकाव्यप्रतिभा परिलक्ष्यते।

**परिशीलितग्रन्थपञ्जिः–**


गोस्वामी, कविकर्णपूरः। *श्रीकृष्णाह्निक–कौमुदी*। सम्पा. हरिदासदासः। कलकाता : संस्कृत पुस्तक भाण्डार, २०१३।

गौस्वामी, कविकर्णपूरः। *अलङ्कारकौस्तुभः*। सम्पा. रविशङ्करनागरः। दिल्ली : परिमल पब्लिकेशन्स, १९९३। (परिमल संस्कृत ग्रन्थमाला ३)

विश्वनाथः। *साहित्यदर्पणः*। सम्पा. गुरुनाथः विद्यानिधिः। कलकाता : सदेश, २०१२।

वामनः। *काव्यालङ्कारसूत्राणि*। सम्पा. हरगोविन्दः शास्त्री। चोखम्बा सुरभारती प्रकाशन : वाराणसी, २०१८।


---

26 तदेव – १/१२९
27 तदेव – १/१९, ६/६२
28 तदेव – १/३६
29 तदेव – ३/३६
30 तदेव – २/७३
31 तदेव – ४/१५८
32 तदेव – ४/१८९–१९०

# HAND-GESTURES OF SATRĪYA DANCE ACCORDING TO *HASTA-MUKTĀVALĪ*

**Sourav Dutta**

**Abstract**

Dance is a series of movements performed in patterns and set to an accompaniment of Music. In the earliest societies, dance helped human beings to survive, it was one way for communication to learn cooperation in working and hunting together. Then with the advancement of civilization, dance gradually evolved from a life support tool to a strong art medium. People around the world use dance to express themselves, pass on their history and exercise their bodies. In this way dance can be a method of celebration of the emotional, mental and physical human self.

An overall idea about the nature of dance in Indus-valley civilization can be obtained from the dancing statues those have been found from the remains of that civilization. Even we see numerous references to dance in Vedic and post-Vedic literature from which it can be easily surmised that dance was very popular in the society of those times. In this regard some books of post-Vedic literature are noteworthy *Nāṭyaśāstra, Abhinayadarpaṇa, Saṅgītaratnākara, Saṅgitadāmodara* etc.

In such books, the techniques of dance are discussed in detail and based on such books eight classical dance forms of India like 'Bharatanāṭyam', 'Katthak', 'Oḍiṣī', 'Satrīya','Maṇipurī', 'Kucipuḍi' 'Kathākali', and 'Mohinīyāṭṭam' have been developed. Among these dance forms Satrīya is one of the major classical dance-forms that has been developed in Assam, north-eastern state of India. This dance form is rich in Vaiṣṇava cult and here we see the use of various classical postures along with various hand-

gestures. These hand gestures are performed based on a book named *Hastamuktāvalī* written by Ācārya Śubhaṅkara. In this proposed paper these hand-gestures or mudrās are discussed shortly with necessary scriptural references and the pictures of each mudrās are given. Hope, this initiative will be appreciated by the scholars.

**Keywords:** Mudrās, Satrīya dance, *Hastamuktāvalī*, Indian classical dance, Śubhaṅkara.

**Introduction:**

Satrīya is an ancient classical dance form of the Vaiṣṇava tradition of Assam, India. This dance is considered as one of the products of Bhakti movement in Assam. Before the Bhakti movement, there were mainly two dance styles prevalent in Assam- Oja Palli & Devadāsī. Two types of Oja Palli dance are still practised in Assam - 1) Sukanānī: the dance performed during the worship of the snake goddess Manasā & 2) Vyāhāra gīta: the dance performed in accordance with the Rāmāyaṇa, Mahābhārata & Purāṇas translated into Assamese language. Sukanānī dance related with the śākta community and Vyāhāra gīta dance related with the vaiṣṇava community. By the initiative of Śrīmanta Śaṅkaradeva, one of the pioneers of the Assamese bhakti movement, Vyāhāra gīta dance began to be practised in religious ceremonies held in vaiṣṇava-satras of Assam around the 15th century AD. This is the oldest form of Satrīya dance.

Around the mid-1900s, this dance moved from vaiṣṇava religious gatherings to the modern stage. In vaiṣṇava religious ceremonies, this dance was performed only by the men of the Assamese vaiṣṇava caste. But after gaining recognition to the modern stage, women also started participating in this dance. On November 15, 2000, the Sangeet Natak Akademi of the Government of India conferred the status of Indian classical dance on Satrīya. The main events of this dance can be divided into various parts such as sūtradhāra, apsarā nṛtya, behāra nṛtya, chāli nṛtya, daśāvatāra nṛtya, rāsa nṛtya, gosāi praveśa, gopī praveśa etc.

Hastamudrās are used in Satrīya dance according to *Hastamuktāvalī* book written by Ācārya Śubhaṅkara. This book was written between the middle of the 13th century A.D. to the middle of the 16th. This book does not cover all the gestures of Satrīya dance. Only hastamudrās are discussed here in detail. At the beginning of this book, the auspicious Nāndī śloka has been seen. After that, the definition and uses of thirty single hand-gestures, fourteen double hand-gestures and twenty seven nṛtta-hastas have been provided. Thus the book ended.

A pictorial description about the mudrās of *Hastamuktāvalī* is given below.

असंयुतहस्ताः
असंयुतानां हस्तानामुद्देशः क्रियतेऽधुना।
शुभङ्करेण कविना नानाभिनयशालिना।।
पताकः पद्मकोशश्च हंसास्यः कर्तरीमुखः।
अलपद्मस्त्रिपताको मुष्टिकः शिखरस्तथा।।
अर्धतन्द्रः सर्पशिरः सूच्यास्यः खटकामुखः।
अरालः शुकतुण्डश्च सन्दंशः काङ्गुलस्तथा।।
उर्णनाभोऽपि कथितः कपित्थो मृगशीर्षकः।
हंसपक्षस्ताम्रचुडश्चतुरो मुकुलस्तथा।।
भ्रमरश्च कदम्बश्च कृष्णसारमुखाह्वयः।
घ्रोणिकोऽप्यथ सिंहास्योऽङ्कुशस्तन्त्रीमुखस्तथा।। (ह.मु. 15–19)

Total 30 kinds of single hand-gestures are used in Satrīya dance-Patāka, Padmakośa, Haṃsāsya, Kartarīmukha, Alapadma, Tripatāka, Muṣṭika, Śikhara, Ardhacandra, Sarpaśira, Sūcīmukha, Khaṭakāmukha, Arāla, Śukatuṇḍa, Sandaṃśa, Kāṅgula, Ūrṇanābha, Kapittha, Mṛgaśīrṣa, Haṃsapakṣa, Tāmracūḍa, Catura, Mukula, Bhramara or Calanmadhukara, Kadamba, Kṛṣṇasāramukha, Ghroṇika, Siṃhāsya, Aṅkuśa and Tantrīmukha.



Patāka



Padmakośa



Haṃsāsya



Kartarīmukha



Alapadma



Tripatāka



Muṣṭika



Śikhara



Ardhacandra



Sarpaśira



Sūcīmukha



Khaṭakāmukha



Arāla



Śukatuṇḍa



Sandaṃśa



Kāṅgula



Ūrṇanābha



Kapittha



Mṛgaśīrṣa



Haṃsapakṣa



Tāmracūḍa



Catura



Mukula



Bhramara or Calanmadhukara



Kṛṣṇasāramukha



Kadamba



Ghroṇika



Siṃhāsya



Tantrīmukha



Aṅkuśa

संयुतहस्ताः

संयुतानाञ्च हस्तानामुद्देशः क्रियतेऽधुना।।
गजदन्तः कपोतश्च वर्धमानाञ्जली तथा।
निषधः कर्कटश्चैव तथोत्सङ्गोऽवहित्थकः।।
स्वस्तिको मकरो दोलस्तथा पुष्पपुटाभिधः।
मरालश्च तथैवान्यः खटकावर्धमानकः।। (ह.मु. 20–22)

Total 14 kinds of double hand-gestures are used in Satrīya dance- Gajadanta, Kapota, Vardhamāna, Añjali, Niṣadha, Karkaṭa, Utsaṅga, Avahittha, Svastika, Makara, Dola, Puṣpapuṭa, Marāla and Khaṭakāvardhamāna.



Gajadanta



Kapota



Vardhamāna



Añjali


Niṣadha


Karkaṭa


Utsaṅga


Avahittha


Svastika


Makara



Dola



Puṣpapuṭa



Marāla



Khaṭakāvardhamāna

## Single hand-gestures of Satrīya dance

**Patāka:** If all the fingers of hand are kept straight and close to each other & the thumb is slightly bent, then it is called Patāka mudrā[1].

It is used to denote water, shame, forest, embrace, child etc[2].

**Padmakośa:** When all the fingers are kept separately and bent at the ends to make a round shape, then it is called Padmakośa mudrā[3].

It is used to denote blooming lotus, umbrella, shaved head, pomegranate fruit, begging bowl etc[4].

---

1 प्रसारिताग्रा: सहिता भवन्त्यङ्गुलयो यदि।
कुञ्चित: किञ्चिदङ्गुष्ठ: पताक: स्यात्तदा कर: ।। (ह.मु. 31)

2 जले जगति लज्जायां... शिशौ च पशुशावके ।। (ह.मु. 81–105)

3 यस्याङ्गुल्य: समुत्ताना: शिरसा किञ्चिदानता:।
असंयुक्ता वर्तुलाश्च स भवेत्पद्मकोशक: ।। (ह.मु. 32)

4 वालनारोकुचे फुल्लपद्मे विकसितोत्पले।
.............
स्थाल्यामप्यथ भृङ्गारे तथान्यजलपात्रके।। (ह.मु. 202–206)

**Haṃsāsya:** If the middle finger, index finger & thumb are joined together forming similar to a goose's beak and if the remaining two fingers are extended, then it is called Haṃsāsya mudrā[5].

It is used to denote kiss, lower lips, saffron, milk, swan etc[6].

**Kartarīmukha:** When the index finger of Patāka mudrā is brought behind the middle finger and the ring finger is bent, then it is called kartarīmukha mudrā[7]. A similar description is available in *Abhinayadarpaṇa*[8]. However, this type of kartarīmukha is not seen in dance. '*Hastalakṣaṇadīpikā*', an epitome book of Kathākali & Mohinīyāṭṭam dance, mentioned a mudrā called 'Śikhara'- If the middle finger of kapitthamudrā[9] moves forward and the index finger moves back, then it is called Śikhara mudrā[10]. This Śikhara mudrā is used as Kartarīmukha mudrā in dance.

It is used to denote eyes, book, shame, fire, anklet etc[11].

**Alapadma:** If all the fingers of hand are spaced on the palm side, then it is called Alapadma mudrā[12]. But this definition is not clear enough. In *Abhinayadarpaṇa*, we see an easily understandable definition of this mudrā - If all the fingers of hand are spaced curvedly then it is called Alapadma mudrā.[13]

It is used to denote lotus, coconut, umbrella, palmyra, rotation etc[14].

---

5 मध्यमा तर्जनी वृद्धा मिलित्वा हंसतुण्डवत्।
प्रसारिते च शेषे द्वे हंसास्य: प्रथित: कर: ।। (ह.मु. 33)

6 अधरे चुम्बने पाने सुधायामनुलेपने।
...............
हंसास्यो नाम हस्तोऽयं कथित: प्रथितो मया।। (ह.मु. 214–223)

7 पताकस्य तर्जनी चेन्मध्यमापृष्टावलोकिनी।
अनामिका च नमिता तदा स्यात् कर्तरीमुख: ।। (ह.मु. 34)

8 अस्यैव चापि हस्तस्य तर्जनी च कनिष्ठिका।
वहि: प्रसारिते द्वे च कर: कर्तरीमुख: ।। (अभि.द. 105)

9 If the little and ring fingers are bent, the thumb is placed above the ring finger and index & middle fingers are extended upwards, it is called Kapittha mudrā. (*Hastalakṣaṇadīpikā*)

10 पुरतो मध्यमं चापि पृष्ठतस्तर्जनीं नयेत्।
कपित्थहस्तस्तु तदा प्राप्नुयात् शिखराभिधाम्।।

11 नयने दर्शने शृङ्गे चरणे पथि रिङ्गणे।
...............
कर्तरीमुखनामायं हस्तक: कथितो मया।। (ह.मु. 237–246)

12 सर्वा: पार्शकृतावर्ता विकीर्णा विरलाऽपि।
अङ्गुल्यो यस्य हस्तस्य सोऽलपद्म: करो मत:।। (ह.मु. 36)

13 कनिष्ठाद्या वक्रिताश्च विरलाश्चालपद्मक:। (अभि द. 146)

**Tripatāka :** When the ring figure of the Patāka mudrā is bent, it is called Tripatāka mudrā[15].

It is used to denote invocation, abandonment, prostration, addressing, sleeping etc[16].

**Muṣṭika:** If the four fingers of hand are tightly fisted on palm and the thumb is placed above them, it is called Muṣṭika mudrā[17].

It is used to denote beating, breaking of tree branch, ghost, sound of conch, vine etc[18].

**Śikhara :** If the thumb of the Muṣṭika mudrā is extended upwards, it is called Śikhara mudrā[19].

It is used to denote peak, war, descent, thunderbolt, funeral ceremony etc[20].

**Ardhacandra:** If the middle, ring and little finger are fisted and index finger & thumb are extended keeping distance between them, it is called ardhacandra mudrā[21].

It is used to denote full and half moon, beautiful young woman, hip, bangle, earing etc[22].

**Sarpaśira:** If the five fingers of hand are jointly extended upwards like patāka mudrā and the palm is hollowed, it is called Sarpaśira mudrā[23].

---

14 राधिकायां घृताच्या...ञ्च ......... कर: स्यादलपद्मक:।। (ह.मु. 285-289)

15 पताके तु यदा हस्ते नमिता स्यादनामिका।
त्रिपताक: कर: प्रोक्तस्तदा जनमनोहर: ।। (ह मु. 37)

16 आवाहनेवतरणे विसर्जने निवारणे।
...............
कथितस्त्रिपताकोयमेते स्वहस्तको मया।। (ह.मु. 295–306)

17 चतस्त्रोङ्गुलयो यत्र दृढमुष्टीकृता: करे।
तासामुपरि चाङ्गुष्ठस्तदा मुष्टिक उच्यते।। (ह.मु. 38)

18 प्रहारे वृक्षशाखादिभञ्जने कुचमर्दने.. मुष्टिक: कर ईरित:।। (ह.मु. 346–353)

19 ऊर्धग: सुस्थिरोङ्गुष्ठो यदि मुष्टिकहस्तके।
तदायं शिखरो नाम हस्तक: समुदीरित: ।। (ह.मु. 39)

20 पर्वते शिखरे वंशे संग्रामे मारणे तथा।
...............
शिखरो नाम हस्तोयमेतेषु कथितो मया।। (ह.मु. 368–372)

21 मध्यमानामिका चैव कनीयस्यपि मुष्टिका।
अर्धचन्द्र: कर: प्रोक्तस्तर्जन्यङ्गुष्ठदूरत: ।। (ह.मु. 41)

22 पूर्णचन्द्रेऽर्धचन्द्रे शङ्खेऽनूरुनिरूपणे।
...............
करोऽर्धचन्द्रमासायमेतेषु कथितो मया। (ह.मु 379–384)

23 अङ्गुल्य: संयुता यस्य साङ्गुष्ठास्तलकुञ्चिता:।
शुभङ्करेण कथित: सोऽयं सर्पशिर: कर:।। (ह.मु. 42)

It is used to denote snake, small boat, worship of God, smear, water sports etc[24].

**Sūcīmukha:** If the index finger, ring finger & little finger are extended upwards and the thumb is placed on the middle finger, it is called Sūcīmukha mudrā[25].

This mudrā is used to denote stars, baby snake, incense, creepy plant, underground etc[26].

**Khaṭakāmukha:** If the thumb is placed on the tip of the middle and index finger, the ring finger is little bent and the little finger is placed straight, then it is called Khaṭakāmukha mudrā[27]. This mudrā is quite similar to the Haṃpsāsya mudrā.

This mudrā is used to denote dressing, fate, Rāma avatāra of Viṣṇu, peacock tail, sword etc[28].

**Arāla:** If the thumb and the index finger are bent and the remaining fingers are extended, it is called Arāla mudrā[29].

It is used to denote marriage, Lakṣmī, letter writing, drawing, invocation etc[30].

**Śukatuṇḍa:** When the ring finger of Arāla mudrā is bent, it is called Śukatuṇḍa mudrā[31].

It is used to denote mountain peak, tree, bow, creepy plant, abandonment etc[32].

---

24 भुजङ्गे क्षुद्रनौकायां भुजङ्गमगतौ तथा।
...............
ख्यात: सर्पशिरा नाम हस्तक: कथितो मया।। (ह मु. 397–399)

25 ऊर्ध्वीकृता तर्जनी चेदङ्गुष्ठो मध्यमोपरि।
प्रतारिते तु शेषे द्वे तदा सूचीमुख: कर:।। (ह.मु. 43)

26 तारकायां घने कुम्भे चक्रे धूपे शिशूरगे... सूच्यास्य: कथित: कर:।। (ह.मु. 409–423)

27 तर्जनीमध्यमाङ्गुल्यो मूर्ध्नि वृद्धा निकुञ्चिता।
कनिष्ठानामिके किञ्चिन्नम्रोर्ध्वे खटकामुख: ।। (ह. मु 44)

28 हारे विहारे शृङ्गारे ... श्रीरामस्यावतारे च भारे च खटकामुख: ।। (ह मु. 443–449)

29 सवृद्धा तर्जनी नम्रा चापकोटिद्वयी यथा।
शेषास्तिस्रोझावलिता अरालोङ्गुलय मत:।। (हमु 45)

30 विवाहे कौतुके लक्ष्या लिखने चित्रकर्मणि .............. कथितोऽरालहस्तक: ।। (ह मु 461-470)

31 अरालस्यैव हस्तस्य सन्नता चेदनामिका।
शिवत्रिशूलसदृश: शुकतुण्डस्तदा मत:।। (ह.मु. 46)

32 गिरिशृङ्गे तथा वाले पुरन्दरधनुष्यपि................... शुकतुण्डो मयोदित:।। (ह मु 486–489)

**Sandaṃśa:** If the thumb and the index finger of Arāla mudra are joined, it is called Sandaṃśa mudrā[33].

It is used to denote diamond, brahmin, coral, sentence, ear etc[34].

**Kāṅgula:** If the middle finger, thumb and index finger are placed together separately, the little finger is upward and the ring finger is curved, then it is called Kāṅgula mudrā[35].

It is used to denote nose, nail, mercy, pearl, Cupid etc[36].

**Ūrṇanābha:** If all the fingers of padmakośa mudrā are curved, it is called Ūrṇanābha mudrā[37].

It is used to denote head-itching, lion, tiger, theft, disease etc[38].

**Kapittha:** If the index finger of Śikhara mudrā is placed curvedly over the thumb, it is called Kapittha mudrā[39].

It is used to denote goad(aṅkuśa), spear, wheel, scripture, lamp etc[40].

**Mṛgaśīrṣa:** If the thumb and little finger are upward and the remaining three fingers are downward, then it is called Mṛgaśīrṣa mudrā[41].

It is used to denote blessing, owl, teeth, curd, prayer etc[42].

**Haṃsapakṣa:** If the index, middle and ring fingers are parallelly stretched forward, the little finger is held upward and the thumb is in a bent position, then it is called Haṃsapakṣa mudrā[43].

---

33 अरालस्यैव हस्तस्याङ्गुष्ठंदशति तर्जनी।
यदा तदैव कथित: सन्दंश इति हस्तक:।। (ह मु 47)

34 हीरके कुसुमोद्धारे वर्त्याञ्च पूरणे तथा।
...............
सन्दंशो नाम हस्तोऽयमेतेषु कथितो मया।। (ह. मु. 499–520)

35 मध्यमाङ्गुष्ठतर्जन्यौ यदेकत्र स्थिता पृथक्।
कनिष्ठोर्ध्वा तथा वक्रानामिका काङ्गुलस्तदा।। (ह. मु. 48)

36 कामदेवेथ मुक्तायां रत्ने ... शिञ्जिकायाञ्च काङ्गुल:।। (ह.मु. 543–551)

37 पद्मकोशस्य हस्तस्य भवन्त्यङ्गुलयो यदि।
कुञ्चितावचिता: सर्वा ऊर्णनाभ: प्रकीर्तित:।। (ह.मु. 49)

38 शिर: कण्डूयने सिंहे व्याघे ... ऊर्णनाभो मयोदित:।। (ह.मु. 560-562)

39 शिखराख्यस्य हस्तस्य वक्राकारा प्रदेशिनी।
अङ्गुष्ठपीडिता स्याच्चेत् कपित्थस्तु तदा कर:।। (ह.मु. 50)

40 अंकुशे वडिशे चक्रे ... कपित्थ: कथितो मया।। (ह.मु. 572–575)

41 ऊर्ध्वे वृद्धाकनीयसौ तिस्रोन्या: सन्नता यदि।
अङ्गुल्यो मृगशीर्षोऽयं भवति स कवेर्मत:।। (ह.मु 51)

42 जीवेति मङ्गले हस्वे ... मृगशीर्षो मयोदित:।। (ह.मु 581–588)

43 पुन: प्रसारितास्तिस्रस्तथा चोर्ध्वा कनीयसी।
अङ्गुष्ठ: कुञ्चितश्चैव हंसपक्ष: प्रकीर्तित:।। (ह मु. 52)

It is used to denote water, acceptance, embrace, sky, thought etc[44].

**Tāmracūḍa:** If the middle finger and thumb are joined, the index finger is curved, the little finger and ring finger are touch the palm, then it is called Tamracūḍa mudrā[45].

It is used to denote yawning, copper, lotus, signal, Vāmana avatāra of Viṣṇu etc[46].

**Catura:** If the fore finger, middle finger and the ring finger are closed to each other and the little finger is extended and the thumb is placed at the end of the middle finger, then it is called Catura mudrā[47].

It is used to denote truth, memory, eye, happiness, cloths etc[48].

**Mukula:** If the upward fingers of hand are joined, it is called Mukula mudrā[49].

It is used to denote giving, worship of God, eating, kissing, blood etc[50].

**Bhramara:** The thumb is placed on the bent middle finger, the little finger is raised and the index & ring fingers are slightly bent & humbly vibrating. This is called Bhramara or Calanmadhukara[51].

This mudrā is used to denote game, earing, bee, takṣaka (kind of winged snake), Varāha avatāra of Viṣṇu etc[52].

**Kadamba:** If the fingers of padmakośa mudrā are little curved (if fingers are curved excessively, then it will become Ūrṇanābha mudrā), it is called Kadamba mudrā[53].

---

44 तोये च तरुणीलोके .... हंसपक्षस्तु कथितो हृदयङ्गमः ।। (ह.मु. 604–608)

45 मध्यमाङ्गुष्ठसंयोगात्तर्जन्या वक्रभावतः।
अन्ये द्वे तु तलस्थे चेत्ताम्रचूडः करो मतः।। (ह मु. 53)

46 संकेते जृम्भणे शीघ्रे .................. ताम्रचूडो मयोदितः ।। ह.मु (616-620)

47 कनीयसी भवेदूर्ध्वा तिस्त्रोऽङ्गुल्यः प्रसारिताः।
तासां मध्ये स्थितोऽङ्गुष्ठस्तदा स्याच्चतुरः करः।। (ह.मु. 54)

48 सुरते कैवते सत्ये .................. मयोक्तकं चतुरः करः।। (ह.मु 627-640)

49 संहताश्च संहिताश्च यस्याङ्गुल्यो भवन्ति हि।
सर्वा एव समुत्तानाः स भवेन्मुकुलः करः।। (ह.मु. 55)

50 प्रदाने मुखसंकोचे देवार्चायां वलिग्रहे।
...............
मुकुलो नाम हस्तोऽयमेतेषु कथितो मया।। (ह. मु. 648-658)

51 मध्यमाङ्गुष्ठसंयोगादूर्ध्वगापि कनीयसी।
अन्यौ नम्रौ कम्पमानश्चलन्मधुकरस्तदा।। (ह.मु. 57)

52 क्रीडायां कर्णपूरे च भृङ्गध्वनिनिरूपणे।
...............
वराहरूपधृक्कृष्णे भ्रमरः कथितो मया।। (ह. मु. 665–667)

It is used to denote thirst, end, burflower, eating, summer etc[54].

**Kṛṣṇasāramukha:** If the middle finger, ring finger and thumb are joined together and the index and little fingers are extended upwards, it is called Kṛṣṇasāramukha mudrā[55]. A similar mudrā is also used in bharatanāṭyam dance named Siṃhamukha[56].

It is used to denote black deer, lying down, riverside, wind, meditation etc[57].

**Ghroṇika:** If the tips of five fingers are joined in a circle and appear like a pig, it is called Ghroṇika mudrā[58]. If the Mukula mudrā is kept upside down, it also looks similar to this mudrā.

It is used to denote pig, pig's mouth, breast-pressing etc[59].

**Siṃhāsya:** If the index, middle and ring finger are joined by side and slightly upward and thumb & little finger are extended maintaining their distance with each other, it is called Siṃhāsya mudrā[60].

It is used to denote lion's face, tiger's face, bear's face, capricorn etc[61].

**Aṅkuśa:** If the forefinger of the Muṣṭika mudrā is raised and bent, then it is called Aṅkuśa mudrā[62].

---

53 पद्मकोशापेक्षया तु यः स्यात् संकुचितः करः।
कदम्ब इति विज्ञेयश्चेतः कौतुकपूरकः।। (ह.मु. 58)

54 शेषे धर्मे तृषायाञ्च ... कदम्बः कर ईरितः। (ह मु 675-677)

55 मध्यमानामिकावृद्धाः सन्नताः स्युः परस्परम्।
अन्ये द्वे चाल्पनम्रोर्ध्वे कृष्णसारमुखस्तदा।। (ह.मु. 59)

56 If the tips of middle finger, ring finger and thumb are joined and the remaining two fingers are extended, it is called Siṃhamukha mudrā

57 शयने दशने हारे नदीतीरे समीरणे।
...............
कृष्णसारमुखे चैव कृष्णसारे मृगे तथा।।
...............
श्रीशब्दे च मया प्रोक्तः कृष्णसारमुखः पुरः।। (ह मु. 687–688)

58 पञ्चाङ्गुलीनां पुरतो वर्तुलीकरणादयम्।
घ्रोणिको नाम हस्तः स्यात् घ्रोणिकाननसन्निभः।। (ह.मु. 60)

59 शूकरे शूकरास्ये च जलादिभवबुद्बुदे।
...............
मर्दने च कुचाग्रस्य घ्रोणिकः कथितो मया।। (ह.मु 696)

60 वृद्धाकनिष्ठे विरले पुरोऽन्याः पार्श्वसंयुताः।
उत्थिताः शिरसा किञ्चित् सिंहास्यः सिंहवक्त्रवत्।। (ह मु. 61)

61 सिंहानने च सिंहे ..................सिंहास्यः कथितो मया।। (ह.मु. 700–701)

62 मुष्टीकृता हस्ततले सर्वाङ्गुल्योऽतियऽन्त्रिताः।
किञ्चिद्वक्राग्रदेशेन तर्जनी चेत्तदाङ्कुशः।। (ह मु. 62)

It is used to denote aṅkuśa (driving stick of elephant used by the elephant driver), thunder, affection, book etc[63].

**Tantrīmukha:** If the ring finger and middle finger are curved and the remaining three fingers are extended maintaining their distance with each other, it is called Tantrīmukha mudrā[64].

It is used to denote meditation, throne, crematorium, harp etc[65].

## Double hand-gestures of Satrīya dance

**Gajadanta:** If two Sarpaśira or Sarpaśīrṣa mudrās are bent at their elbows & placed in front of us, then it is called Gajadanta mudrā[66].

It is used to denote marriage, elephant, moonlike face, long boat, etc[67].

**Kapota:** If the palms of both hands are joined but the middle should be empty, then it is called kapota mudrā[68].

It is used to denote manners, appeal, fear, winter, immersion etc[69].

**Vardhamāna:** If two Mṛgaśīrṣa mudrās are joined and placed in front, then it is called Vardhamāna mudrā[70].

It is used to denote window, city, collection, moderation, truth etc[71].

**Añjali :** If two patāka mudrās are joined side by side and the palms are slightly curved or hollowed, then it is called Añjali mudrā[72].

---

63 गजाङकुशे चास्त्रभेदे..................शङ्खादेर्मयोक्तोऽड्कुशहस्तक:।। (ह. मु. 707–709)

64 अनामिका मध्यमा च वक्रे तु यदि लम्बिते।
तिस्रोऽन्या विरला: शेषास्तदा तन्त्रीमुख: कर: ।। (ह मु. 63)

65 प्राणायामे च तिलके ... प्रोक्तस्तन्त्रीमुखो मया।। (ह.मु. 719–722)

66 सर्पशीर्षो यदि स्यातां कूर्परौ कुञ्चितौ पुर:।
शुभङ्क्करेण कथितो गजदन्तस्तदा कर:।। (ह.मु. 65)

67 विवाहमुखचन्द्राद्ये कन्याभ्रमणिकादिके।
...............
तथैव दीर्घनौकायां गजदन्तो निदर्शित:।। (ह.मु. 738–739)

68 अन्योन्यविहिताश्लेषौ मध्यरिक्तौ यदा करौ।
शुभङकरेण कथित: कपोत: स्यात्तदा कर:।। (ह. मु. 66)

69 विनयेऽनुनये... कपोतो नाम हस्तक: ।। (ह.मु. 747–750)

70 हस्तकौ मृगशीषै द्वौ मिलितौ पुरत: स्थितौ।
शुभङ्क्करेण कथितौ वर्धमान: करेश्वर:।। (ह मु. 67)

71 जालवातायनादौ च नगरे च पुरे तथा।
...............
हस्तको वर्धमानोऽयमेतेषु कथितो मया।। (ह.मु 757–758)

72 पताकाभ्यां कराभ्याञ्चेत् संश्लेष: पार्श्वयोर्भवेत्।
तले किञ्चित् कुञ्चितश्च तदा स्यादञ्जलि: कर:।। (ह.मु.68)

This mudrā is used to denote salutations to deities and gurus, Lakṣmī, maṅgalacaṇḍī, gaṅgā etc[73].

**Niṣadha:** If the palm of the right hand is placed on the elbow of the left hand and if the palm of the left hand is placed on the elbow of the right hand, then it is called Niṣadha mudrā[74].

It is used to denote patience, pride, quriosity, valor, Paraśurāma avatāra of Viṣṇu etc[75].

**Karkaṭa:** If the fingers of both hands are interlocked, it is called Karkaṭa mudrā[76]. It looks like a house made by creeper.

It is used to denote conch, house made by creeper, strange thought, crab, body-massage etc[77].

**Utsaṅga:** If two Arāla mudrās are spread out in front of us facing the palm upwards, it is called Utsaṅga mudrā[78].

It is used to denote bed, blanket, ornaments, darkness, chariot etc[79].

**Avahittha:** When two Śukatuṇḍa mudrās are raised and placed diagonally in front of our chest, it is called Avahittha mudrā[80].

It is used to denote sad people, hunter, fall, weakness, thin body etc[81].

**Svastika:** If two Arāla mudrās held together at the wrists by facing upward and placed on the left side of the body, it is called Svastika mudra[82].

---

73 देवतानमने कृष्णे गुरुविप्रनतौ तथा।
...............
लक्ष्यां मङ्गलचण्ड्याञ्च गङ्गाञ्चाञ्जलि: कर:।। (ह.मु. 764–765)

74 द्वाभ्यां कराभ्याम्बिधृतौ कूर्परौ चेत् परस्परम्।
निषधो नाम हस्तोऽयं तदा स्यात् कविसम्मत:।। (ह.मु. 69)

75 धैर्ये गर्वे मदे... निषध: कथित: कर:।। (ह.मु. 771–772)

76 अन्योन्यान्तरगामिनो यदि चाङ्गुलयो मता:।
स भवेत् कर्कटो नाम लतानिर्मितसद्मवत्।।

77 शङ्खे लतागृहे चैव शङ्खादिवादने तथा।
...............
आश्चर्यचिन्तने चैव कर्कट: कथितो मया।।

78 उच्छिखौ वाममुत्तानौ वृद्धिभाजावरालकौ।
पुरतो दर्शितो स्यातामुत्सङ्ग: स्यात्तदा कर:।। (ह.मु. 71)

79 शय्यायां कम्बलादौ च तूलिके भूषणेऽपि च।
...............
उत्सङ्गो नाम हस्तोऽयं सविलासो मनोहर: ।। (ह.मु. 788-791)

80 तिर्यक् चेदुत्थितशिखौ वक्षस: पुरत: स्थितौ।
शुकतुण्डौ तु हस्तौ द्वावहित्थ: करो मत:।। (ह.मु. 72)

81 दु:खिनां स्यादवहित्थे मदनज्वरपीडिते।
...............
व्याधौ चैव तथोत्थानेऽवहित्यो कथितो मया।। (ह.मु. 796–797)

82 उत्तानौ वामपार्श्वस्थौ मणिवन्धे निवेशितौ।
अरालौ स्वस्तिको हस्त: कथितो हस्तकोविदै: ।। (ह.मु. 73)

It is used to denote the seven islands, forest, festival, morning, pond etc[83].

**Makara:** If two Patāka mudrās are placed one above the other, facing the palm downward and erecting the thumb of both the hands, it is called Makara mudrā[84].

It is used to denote lion, tiger, crocodile, fish, Matsya avatāra of Viṣṇu etc[85].

**Dola:** If two Patāka mudrās are loosely hang down, then it is called Dola mudrā86.

It is used to denote quarrel, senseless, sorrow, boat, disease etc[87].

**Puṣpapuṭa:** When two Sarpaśīrṣa mudrās are joined at their little finger's side, then it is called Puṣpapuṭa mudrā[88]. It looks like a winnowing basket. This mudrā is quite similar to the Añjali mudrā of Satrīya dance.

It is used to denote rice, barley, sesame, wheat, Tarpaṇa (water-offering to the ancestors) etc[89].

**Marāla:** All the fingers of both hands are separated, extended and vibrated. It is called Marāla mudrā[90].

It is used to denote river, fever, war, prowess, spring etc[91].

---

83 सप्तद्वीपावनौ ... स्वस्तिकोऽयं मयोदितः।। (ह.मु. 800–802)

84 उपर्युपरिविन्यस्तौ पताकौ द्वावधोमुखौ।
ऊर्ध्वाङ्गुष्ठौ च मकरः शुभङ्कररसावहः।। (ह.मु. 74)

85 सिंहे व्याघ्रे च कुम्भीरे तथैवान्यचतुष्पदे।
...............
मीने च मकरे चैव मीनरूपिणि माधवे ।। (ह.मु. 811–812)

86 पताकौ लम्बितौ स्यातामधः प्रशिथिलीकृतौ।
दोलानामा भवेदेषः करः करलयान्वितः।। (ह.मु. 75)

87 विवादे विषमे चैव मूर्छायां मूर्छिते तथा।
...............
एते सुकथितो हस्तो दोलनामापरो मया।। (ह.मु 818-821)

88 द्वौ सर्पशीर्षौ हस्तौ मिलितौ शूर्पखण्डवत्।
कनिष्ठपार्श्वसंलग्नौ करः पुष्पपुटो मतः।। (ह.मु. 76)

89 धान्ये यवे तिले... प्रोक्तः पुष्पपुटो मया।। (ह.मु. 826-827)

90 करयोरुभयोरेव विश्लिष्टकरशाखयोः।
कम्पनेनैव कथितो मरालो नाम हस्तकः ।। (ह.मु. 77)

91 नद्यां नदे च तीरे च प्रतापे ज्वलने ज्वरे।
...............
समरे साहसे चैव मरालः कथितो मया।। (ह.मु. 830-834)

**Khaṭakāvardhamāna:** if two Khaṭakāmukha mudrās are joined, then it is called Khaṭakāvardhamāna mudrā[92].

This mudrā is used to denote conch, vagina, sword, lotus etc[93].

In *Hastamuktāvalī* we also see the discussion about twenty-seven nṛtta-hastas- Keśabandha, Nitamba, Recita, Ardharecita, Catura, Udvṛtta, Pallava, Pakṣavañcita, Latā, Natamukha, Svastika, Viprakīrṇa, Āviddha, Sūcyāsya, Arālakhaṭakāmukha, Vakṣomaṇḍalī, Ūraḥpāraśvardhamaṇḍalī, Pārśvamaṇḍalī, Ūrdhvamaṇḍalī, Muṣṭikasvastika, Pakṣapradyotaka, Kari, Daṇḍapakṣa, Garuḍapakṣa, Alapadmonnata, Uttānarecita & Nalinīpadmakośa. These mudrās are not much used in Satrīya dance. That is why they are not described in this short research paper. If ever a detailed research will be done on this topic, hope these mudrās will be discussed as much as possible.

## Bibliography


### Primary Sources

*Abhinayadarpaṇa*: Ed. Manabendu Bandyopadhyay, Saraswata Kunja, Kolkata, 1st Ed. 2010.

*Abhinayadarpaṇa*: Ed. Manmohan Ghosh, Firma K.L. Mukhopadhyay, Calcutta, 1957.

*Hastamuktāvalī*: Ed. Maheswar Neog, Asam Sahitya Sabha, Assam, 1980.

### Secondary Sources

Chakraborty, Mandira: *Bharatnatyam*, Dum Dum Sangeetam, Kolkata, 1st Ed. 2012, 2nd Ed. 2015.

Kutty, Govindan: *Kathakali The Dance—Theatre*, The Asiatic Society, Kolkata, 1st Ed. 1999, Rpt. 2004.


---

92 खटकामुखहस्तेऽन्ये मिलित: खटकामुख:।
शुभङ्करेण कथित: खटकावर्धमानक:।। (ह.मु. 78)

93 शङ्खे योनौ तथा खड्गे रम्भामोच्यान्तथा नतौ।
...............
शृङ्गारे च मया प्रोक्त: खटकावर्धमानक:।। (ह.मु. 844-846)

### Thesis

Lahkar, Smita: *Aspects of Ahinaya in Bharatanatyam and Sattriya-a comparative study*, Department of Dance, Banaras Hindu University, Varanasi, 2017.

Saikia, Dimple: *Sattriya Dance and Manipuri Dance*; *A Comparative Study* , Department of Rabindra Sangit, Dance and Drama, Visva-Bharati University, Santiniketan, 2021.

Tamuli, Krishna: *An Assessment of the Textual and Philosophical Elements in Sattriya Dance of Assam,* Department of Rabindra Sangeet, Dance & Drama, Visva–Bharati University, Santiniketan , 2020.

### Dissertation

Dutta, Sourav: *Nṛtyamudrāy Tantra O Yoger Prāsaṅgikatā : Ekṭi Samīkṣā,* Department of Sanskrit, Rabindra Bharati University, Kolkata, 2021.

### Dictionaries

Bhattacharya, Gurunath Vidyanidhi : *Amarakoṣa*, Sanskrit Pustak Bhandar, Kolkata, 1417 (B.S.).

Biswas, Shailendra, Dasgupta, Shashibhushan & Bhattacharya,
Dineshchandra: *Saṃsad Bāṅgālā Abhidhān,* Sahitya Samsad, Kolkata, 3rd Ed. 1971, 4th Ed. 1984, Rpt. 1986.

Mukhopadhyaya, Govindagopala : *A New Tri-Lingual Dictionary*, Pilgrims Publishing, Varanasi, Rpt. 1999, 2002.

### Journal

Dutta, Sourav: *A few words regarding dance in Vedic literature*, Journal of the Department of Sanskrit, Vol. XXIV., Rabindra Bharati University, Kolkata, 2018-2019, PP 49-55.

**Website:**
https://archive.org

# हरिदाससिद्धान्तवागीशकृत*काव्यकौमुदी*ग्रन्थे *काव्यप्रकाशसाहित्यदर्पण*ग्रन्थयोः प्रभावविषये एकं समीक्षणात्मकमध्ययनम्

**सुमन्तपात्रः**

आधुनिककाव्यशास्त्रनभसि ये खलु आलङ्कारिकभास्कराः स्वज्योतिषा भासन्ते, तेषु चूडामणिरिव राजते महान् आलङ्कारिको हरिदाससिद्धान्तवागीशमहोदयः। तेन बहवो ग्रन्था विरचिता यथा *महाभारतनैषधीयचरिताभिज्ञानशकुन्तलादीनां* टीकाः, *रुक्मिणीहरणा*दिमहाकाव्यानि, *मेबारप्रतापा*दिनाटकानि च विरचितानि आसन्। न केवलं काव्यमेव तेन निरमायि, अपि तु काव्यशास्त्रमपि तेन रचितमासीत्। एवञ्च तेन विरचिता *काव्यकौमुदी* अलङ्कारशास्त्रेषु विशिष्टस्थानं बिभर्ति। तस्यां *काव्यकौमुद्यां* प्राचीनालङ्कारिकाणां महान् प्रभावो दृश्यते। तथापि *काव्यकौमुदीयं* न स्वतन्त्रेति वक्तुमलम्। आचार्यो हरिदाससिद्धान्तवागीशमहोदयो यथास्थानं यथाचार्याणां मतं समर्थयति तथैव प्रयोजनानुसारं खण्डयत्यपि। अस्मिन् शोधपत्रे *काव्यकौमुदी*ग्रन्थोऽयं कियान् स्वतन्त्रः कियान् च परतन्त्र इति यथायुक्ति विचार्यते। अत्र विशेषतया आचार्यमम्मटविश्वनाथयोः प्रभावः कियान् हरिदाससिद्धान्तवागीशमहोदये इति विचार्यते। परन्तु तत्पूर्वं कोऽयं महान् आलङ्कारिक इति ज्ञातव्यम्। अधः ससमासं हरिदासमहोदयस्य परिचयः प्रदीयते।

### ❑ हरिदाससिद्धान्तवागीशमहोदयः

येषां पण्डितमूर्धन्यानां सुविस्तृतमनीषया वङ्गसंस्कृतिः समद्धेश्वरमसीमानम् अधिरूढा, तेषु हरिदासमहोदयस्तु अन्यतमः। काव्यकोविदोऽयम् इदानीन्तनवङ्गदेशान्तर्गतस्य फरिदपुरमण्डलस्य कोटालिपल्ल्या ऊनशियाग्रामे षट्सप्तत्युत्तराष्टादशशततमे ईशवीयाब्दे जनिं लेभे। अस्य पिता गङ्गाधरविद्यालङ्कारो, माता च विधुमुखीदेवी आस्ताम्। अयं विद्वान् मधुसूदनसरस्वत्याः मध्यमभ्रातुः यादवानन्दन्यायाचार्यस्य कुले अजायत।

### ❑ कविकर्मनिपुणो हरिदासः

अस्य हरिदासमहोदयस्य स्मृत्यादिविविधशास्त्रेषु प्ररूढाधिकारितायां सत्यां काव्यस्य विनिर्माणे व्याख्याने तथा समीक्षायाञ्च कृतित्वं सर्वजनविदितमस्ति। पञ्चदशवर्षीय एवासौ *कंसवधनाटकं* प्रणीतवान्।

### ❑ उपाधयो वागीशमहोदयस्य

बहुभिरुपाधिभिरयं संख्यावान् कृती विभूषित एवासीत्। यथा तेषूपाधिषु केचन यथा—विद्यावागीशः, महामहोपाध्यायः, पद्मभूषणम् इत्यादय उपाधयस्तु सुप्रसिद्धा एवासन्।

### ❑ हरिदासमहोदयस्य कवित्वप्रतिभा

मौलिककाव्यकृतीश्चा विहायानेन संस्कृतमहाकाव्यनाटकादीनामुपरि बह्व्यष्टीका विरचिता आसन्। तस्य मौलिककाव्यानि यथा-

महाकाव्यम्— *रुक्मिणीहरणम्*[1]।

खण्डकाव्यम्— *वियोगवैभवम्, शङ्करसम्भवम्, विद्यावित्तवियोगः*।

नाटकम्— *कंसवधम्, जानकीविक्रमम्, वङ्गीयप्रतापम्, मेबारप्रतापम्, शिवाजीचरितम्*।

गद्यकाव्यम्— *सरला*[2]।

अलङ्कारग्रन्थः— *काव्यकौमुदी*।

शास्त्रीयग्रन्थाः— *स्मृतिचिन्तामणिः वैदिकविवादमीमांसा*।

टीकाग्रन्थाः— *भारतकौमुदी, अभिज्ञानकौमुदी, कुमारसन्तोषिणी, चाणक्यचातुरी, कुसुमप्रतिमा* इत्यादयः प्रसिद्धाः।

### ❑ आदौ तावन्नामकरणं विचार्यते

हरिदाससिद्धान्तवागीशकृतालङ्कारग्रन्थस्य नामास्ति *काव्यकौमुदीति*। अत्र आचार्यमम्मटकृ-*तकाव्यप्रकाशग्रन्थस्य* नामकरणस्य प्रभावो दृश्यते। काव्यस्य काव्यानां वा प्रकाश इति *काव्यप्रकाशः*। अपरञ्च काव्यस्य काव्यानां वा कौमुदीति *काव्यकौमुदी*। प्रकाशः कौमुदी च सामान्यत आलोकवाचिनौ। किन्तु पार्थक्यमस्ति तयोः। प्रकाशो[3] नाम आतपः, सूर्यस्य कठोरद्युतिः। किन्तु कौमुदी[4] नाम चन्द्रिका वा ज्योत्स्नेति एतेन *काव्यकौमुदीतः* स्वल्पायासेन काव्यतत्त्वबोधो भवतीति ध्वनितम्। *काव्यप्रकाशा*त्तत्त्वबोधस्तु नानायासेन सुगमः। सत्यमेव *काव्यकौमुदी*ग्रन्थस्य प्रत्येकं वाक्यमतीव सुन्दरं सरलसुरगिरा एव विलिखितम्। तेन सामान्यसंस्कृतच्छात्रौऽप्यनायासेन स्वल्पायासेन वा काव्यतत्त्वं ज्ञातुं स्मर्तुं च शक्नोति। अतो ग्रन्थोऽयमतीव महत्त्वपूर्णो वर्तते। हरिदासमहोदयः स्वयमेव भूमिकायां *काव्यकौमुद्याः* लिखति—"हन्त! कियन्तः शिक्षार्थिनः काठिन्यश्रवणाद् विस्तरभयाच्च

---

1 महाकाव्यमिदं षोडशसर्गात्मकम् १८८० तमे शकाब्दे च प्रकाशितम्।

2 पारिवारिकं सामाजिकं च वस्तु आधारीकृत्य पञ्चपरिच्छेदसमन्वितं गद्यकाव्यमिदम्।

3 प्रकाशोद्योत आतप इत्यमरः

4 चन्द्रिका कौमुदी जौत्स्ना इत्यमरः।

प्राचीनालङ्कारग्रन्थानध्येतुमेव नारभन्ते, केचित्पुनः आरभ्यमाना अपि तदुभयदर्शनादेव विरमन्ति, यावज्जीवं सन्तापमनुभवन्ति च। तेषामिदमपरिहार्य्यं दुःखं निवर्तयितुं महान्तम् आश्वासं विश्वासञ्च विधातुं मया खल्वयं *काव्यकौमुदी*ग्रन्थो निरमायि'' इति।

### ❑ अध्यायविभागे नामकरणं विचार्यते

यथा मम्मटमहोदयः स्वकृतेः *काव्यप्रकाशस्य* अध्यायविभागम् उल्लासपदेन करोति, आचार्यविश्वनाथश्च परिच्छेदपदेन। किन्तु हरिदासमहोदयः किञ्चित् स्वतन्त्रतां प्रदर्शयति अस्मिन् विषये। चन्द्रः खलु पञ्चदशकला अतिक्रम्य पूर्णतामेति। अर्थात् पूर्णिमामुपैति। तथैवायं ग्रन्थोऽपि पञ्चदशकलाविशिष्टोऽस्ति। अर्थात् अस्य ग्रन्थस्य विभागः कलापदेन[5] क्रियते। एवं विभागे महान् कलेवरः अन्यत्रालङ्कारग्रन्थेषु प्रायो नैवावलोक्यते। अधः *काव्यकौमुद्या* विभाग उप्पस्थाप्यते।

**प्रथमभागः**

१. प्रथमाकला—काव्यस्य प्रयोजनकथनं स्वरूपादिनिरूपणञ्च।
२. द्वितीयाकला—दृश्यकाव्यनिरूपणम्।
३. तृतीयाकला—श्रव्यकाव्यनिरूपणम्।
४. चतुर्थीकला—ध्वनिकाव्यनिरूपणम्।
५. पञ्चमीकला—गुणीभूतव्यङ्ग्यनिरूपणम्।

**द्वितीयभागः**

६. षष्ठीकला—अभिधादिशक्तिनिरूपणम्।
७. सप्तमीकला—रसादिनिरूपणम्।
८. अष्टमीकला—नायकादिनिरूपणम्।
९. नवमीकला—नायिकादिनिरूपणम्।
१०. दशमीकला—दोषादिनिरूपणम्।

**तृतीयभागः**

११. एकादशीकला—गुणनिरूपणम्।
१२. द्वादशीकला—रीतिनिरूपणम्।
१३. त्रयोदशीकला—शब्दालङ्कारनिरूपणम्।
१४. चतुर्दशीकला—चित्राद्यलङ्कारनिरूपणम्।
१५. पञ्चदशीकला—अर्थालङ्कारनिरूपणम्।

अनेनैव प्रकारेण चन्द्रवत् पञ्चदशकलातिक्रमणेनैव ग्रन्थोऽयं पूर्णतामेति। अतो ग्रन्थस्यास्य

---

5 कला तु षोडशो भागो (चन्द्रस्य) इत्यमरः।

नामकरणमपि प्रतिपदं सार्थकतामेति।

परन्तु वयं पश्यामश्चेद् अत्र मम्मटविश्वनाथाभ्यां काचित् स्वतन्त्रतास्ति। यथा मम्मटेन दृश्यकाव्यविषये स्वग्रन्थे किमपि न कथ्यते। किन्तु सिद्धान्तवागीशमहोदयस्तु पृथक्तया द्वितीयकलायां सर्वं ससमासमालोचयति। एवं श्रव्य[6]काव्यविषयेऽपि। तथा च रस–नायक[7]–नायिकादीनां निरुपणं *काव्यकौमुद्यां* पृथक्तया कृतमस्ति। यत्तु *काव्यप्रकाशे* नैव कृतम्। चित्राद्यलङ्कारस्य निरुपणमपि मम्मटेन पृथक् न विहितम्। ग्रन्थोऽयमतः *काव्यप्रकाशात्* स्वतन्त्रः।

विश्वनाथकृत*साहित्यदर्पणग्रन्थत*ोऽपीयं *काव्यकौमुदी* स्वतन्त्रास्ति। यथा *साहित्यदर्पणे* दश परिच्छेदाः सन्ति। किन्त्वत्र तु पञ्चदशकलाः सन्ति। *साहित्यदर्पणे* यद्यपि दृश्यकाव्यश्रव्यकाव्यविषयक नायकनायिकाविषयक चित्राद्यलङ्कारविषयकमालोचनमस्ति, तथापि तत्र पृथक्तया परिच्छेदविभागेन तेषामालोचनं नास्ति। किन्तु कौमुद्यां दृश्यकाव्यादीनां प्राधान्येन पृथक्तया कलाविभागेनालोचनं सरलतया कृतमस्ति। कठिनविषयाणामपि सारल्येनालोचनाद्ग्रन्थोऽयं दर्पणादपि स्वतन्त्रः। किन्तु दर्पणस्य प्रभावो नास्तीति वक्तुमपि न शक्यते।

## ❑ *काव्यकौमुद्या* मङ्गलाचरणविचारः

*काव्यप्रकाशे* च *साहित्यदर्पणे* उभयत्रापि मङ्गलश्लोके काव्यदेव्याः सरस्वत्या वन्दनं दृश्यते। यथा *काव्यप्रकाशे*–

> नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
> नवरसरुचिरां निर्मितिमादधती भारती[8] कवेर्जयति।। (*काव्यप्रकाशः*,१/१) इति।

अत्र ग्रन्थकारः क्रियमाणस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं काव्यस्य समुचितदेवतां वाग्देवीं सरस्वतीं नमस्करोति। सा वाग्देवी कीदृशी इति चेदुच्यते यत् सा विधिकृतसकलनियमशून्या, सा देवी केवलानन्दमूर्तिरिव, सा देवी कस्यापि नियमस्याधीना नास्ति, सा देवी शृङ्गारादिनवरसविशिष्टा च रमणीया वर्तते। तादृशी या वाग्देवी भारती विद्यते तां प्रति ग्रन्थकृदस्ति प्रणत इति भावः। अत्र सरस्वतीदेवीं प्रति प्रणतिर्विहितास्ति।

एवमत्र यदि वयं किञ्चित्सूक्ष्मतया विचारयामस्तर्हि अस्मिन् मङ्गलश्लोके एव यथा देव्याः भारत्याः सरस्वत्याः स्वरूपं प्रतिपादितं तथैव काव्यस्य अपि धर्मः प्रतिपादितः। यथा काव्येषु कविः[9] नियतिकृतनियमाधीनो नास्ति। कविः अनलेऽपि शीतलत्वं वा

---

6 केवलश्रवणयोग्यं काव्यं श्रव्यम् (*काव्यकौमुदी*)।

7 प्रधानपुरुषो नायकः (*काव्यकौमुदी*)।

8 ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती इत्यमरः।

9 कवते सर्वं जानाति सर्वं वर्णयति सर्वं सर्वतो गच्छति वा इति कविः।

पद्मादिष्वपि वदनादिकं स्रष्टुं द्रष्टुञ्च शक्नोति। तथैवोक्तं यथा–

**अपारे काव्यसंसारे कविरेकः प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते**।। (*अग्निपुराणम्,* ३३९/१०) इति।

काव्यादानन्द एव जायते, न तु क्वचिदपि दुःखमिति काव्यमपि ह्लादैकमयि। काव्यं कस्यापि अधीनं नास्ति, अर्थात् काव्यजगति कविरेव प्रजापतिः, स काव्यसर्जनकाले कस्यापि अधीनो नास्तीति अनन्यपरतन्त्रम् काव्यम्। यथा देवी नवरसरुचिरा तथैव काव्यमपि शृङ्गारादिरसविशिष्टम्। एवमत्र देव्याः भारत्याः धर्मप्रतिपादनकालेनैव काव्यस्यापि धर्मा व्यज्यन्ते इति प्रतिभाति।

एवञ्च *साहित्यदर्पणे* मङ्गलं यथा–

**शरदिन्दुर्सुन्दररुचिश्चेतसि सा मे गिरां देवी**
**अपहृत्य तमोऽर्थानखिलान् प्रकाशयतु**।। (*साहित्यदर्पणे* १/१) इति।

अर्थात् शरदिन्दोरिव शारत्कालिकचन्द्रस्येव सुन्दरी अतिविशदा रुचिर्दीप्तिर्यस्याः सा तादृशी। सा चतुराननादिवाग्वैभवदातृतया शास्त्रपुराणादिप्रसिद्धा, एन[10] विष्णुना सह विद्यमाना वा गिरां देवी वाचां नियन्त्री (अधिष्ठात्री) देवता सरस्वती, मे मम, चेतसि हृदये सन्ततं व्याप्तम्, तमो लक्षणया तमोगुणजनितम् अज्ञानम्, अपहृत्य दूरीकृत्य, अखिलान् समग्रान् अर्थाद् ग्रन्थनिर्माणोपयोगि वाच्यलक्ष्यव्यङ्ग्यात्मकमभिधेयजातं प्रकाशयतु प्रकटीकरोतु इति। अर्थात् शरदिन्दुर्यथा तमोऽन्धकारमपहृत्य विनश्य अखिलान् अर्थान् लोकव्यवहारोपयोगिनो घटपटादिरूपप्रमितिपदार्थान् प्रकाशयति तद्वदित्याशयः। अत्रापि वाग्देव्या एव वन्दनं क्रियते विश्वनाथाचार्येण।

एवं पूर्वाचार्याणां प्रायः समेषाम् आलङ्कारिकाणां ग्रन्थेषु मङ्गलश्लोके वाग्देवी सरस्वती एव स्मर्यते। एषा एव परम्परा वर्तते इति वक्तुं शक्यते। एतां प्रसिद्धपरम्परामनुसरति।

अर्वाचीनालङ्कारिकशिरोमणिर्हरिदाससिद्धान्तवागीशमहोदयस्तदीयालङ्कारग्रन्थे *काव्यकौमुद्याम्*। अपरञ्च मङ्गलमवश्यकर्तव्यं ग्रन्थादौ। **मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति, अध्येतारश्च प्रवक्तारो भवन्ति** *(महाभाष्यम्)* इति भूवादिसूत्रस्थां महाभाष्यकारोक्तिं मनसि निधाय ग्रन्थकृद् हरिदासविद्यावागीशमहोदयो ग्रन्थादौ कविभारतीस्तवनरूपं मङ्गलं *काव्यकौमुद्यां* साहित्यतत्त्वानामुल्लेखपूर्वकं काव्यशैल्या विदधाति यथा–

**गुणवती सरसा सदलङ्कृतिर्विविधभावयुता मधुरध्वनिः।**

---

10 अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकार उच्यते ब्रह्मा प्रणवेन त्रयो मतः।। इति *कल्पद्रुमे*।
अर्थात् अकारस्तु विष्णुपदवाच्यः, तस्यैव अकारस्य तृतीयैकवचने एन इति रूपम्।

**विशदवर्णमयी सुहसा च सा हृदि सदा प्रतिभातु सरस्वती**।। (प्रथमा कला) इति। अर्थात् सा देवी सरस्वती मम (ग्रन्थकारस्य वागीशमहोदयस्य) हृदि सदा प्रतिभातु, सदा विराजतु इति ग्रन्थकर्तुराशयः। पुनश्च सा देवी सरस्वती कीदृशी चेदुच्यते यत् सा गुणवती, सरसा, सदलङ्कृतिः[11], विविधभावयुता, मधुरध्वनिः,विशदवर्णमयी, सुहसाच। अत्र देव्या ये धर्मा उक्ताः, ते यथा देव्याः सम्भवन्ति, तथैव काव्यानां विशेषतया उत्तमकाव्यानामपि भवितुमर्हन्ति। तत्कथमिति चेदुच्यते यद् देव्यां यथा नित्यज्ञानसुखादिगुणा भवन्ति तथैव काव्येष्वपि ओजःप्रसादमाधुर्यादिगुणास्तिष्ठन्त्येव। देवी यथा सरसा आनन्दमयी भवति तथैव काव्यमपि शृङ्गारादिरसविशिष्टत्वाद् आनन्दप्रदं जायते। एवं देवी यथा यथोपयुक्तालङ्कारविशिष्ट[12] सती चमत्कारवती भवति तथैव अनुप्रासोपमादिसदलङ्कारणां रसाक्षिप्ततया प्रयोगो भवति चेत् काव्यमपि चमत्कारकारि प्रतीयते। देवी सरस्वती विविधभावयुता अर्थाद् इष्टप्रदानादिक्रियावती भवति। देव्याः सरस्वत्याः गिरस्तु निसर्गत एव मधुराः श्रवणमाधुर्यादिगुणविशिष्टत्वात्, अतस्तदुपासकानां चेतश्चमत्कुर्वते तथैव काव्यमपि शृङ्गारादिरसध्वनिविशिष्टत्वात् सहृदयानां[13] हृदयानि आह्लादयति मादयति च। एवञ्च यथा देवी विशदवर्णमयी अर्थात् शुक्लपटावृता भवति, तथैव काव्यमपि नायकादीनां सद्गुणादिकीर्तनरूपतन्तुभिः यशःपटं प्रतनोति। तत्पटेन काव्यं स्वयमपि श्वेतवस्त्रावृतं यशोयुक्तं च भवति। यथा देवी सुहसा शोभनहासविशिष्टा भवति तथैव काव्यपाठात् आनन्दो जायते,ततः स्वत एवास्ये सहृदयस्य स्मितहासो दरीदृश्यते, अतः काव्यमपि सुहासाय कल्पते इत्याशयः।

अत्राचार्ययोः कियान् प्रभावोऽस्तीति तु स्पष्टमेव।

इदमत्र वयं कथयितुं शक्नुमो यत् मङ्गलाचरणविषये वागीशमहोदयः आचार्यमम्मटदर्शितमार्गमनुगच्छति। अर्थादेकस्मादेव कार्यात् फलद्वयं सिध्यति। एकं फलं मङ्गलाचारणविधानम्, अपरं तु काव्यस्वरूपकथनमिति। अर्थान्मङ्गलाचरणेऽस्मिन् मम्मटभट्टस्य प्रभावो दृश्यते इति भावः।

### ❑ काव्यप्रयोजनविषये *काव्यकौमुदी*।

काव्यस्य प्रयोजन[14] विषये विविधाचार्याणां भिन्नमतानि दृश्यते। तत्र भट्टमम्मटेनोक्तम्

---

11 न कान्तमपि निर्भूषं विभाति वनिताननम् इति भामहवचनम्

12 अलङ्काररहिता विधेव सरस्वती इति आलङ्कारिकवचः।

13 येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता तेऽत्र हृदयसंवादभाजः सहृदयाः इति ध्वन्यालोकस्य लोचनटीकायाम्।

14 प्रयोजनम् अनुदिश्य मन्दोऽपि न प्रवर्तते इति नयेन लोकस्यसर्वाणि अपि कर्माणि सप्रयोजनानि भवन्ति।

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।** (*काव्यप्रकाशः* १/२) इति।

अर्थात् काव्याद् यशःप्राप्तिः, व्यवहारज्ञानम्, अमङ्गलनाशः, झटिति आनन्दलाभः, कान्तातुल्यः मधुरतया उपदेशलाभः एतानि षट् प्रयोजनानि सम्भवन्ति इति।
अपरञ्च *साहित्यदर्पणे* काव्यस्य प्रयोजनं कथ्यते यथा–

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।**
**काव्यादेव यतस्तेन तत्स्वरूपं निरुप्यते।।** (*साहित्यदर्पणे* १/२) इति।

अर्थात् काव्यात् अनायासेन विदुषां मन्दबुद्धीनाञ्च धर्म–अर्थ–काम–मोक्षलाभो भवतीति विश्वनाथस्याशयः।

किन्तु हरिदासमहोदयस्तथा न मन्यते। चतुर्वर्गादिसिद्धिः काव्याद्वा दर्शनादिग्रन्थेभ्यो भवति न वेति प्रत्यक्षतया नैवावलोक्यते। स तु विचार्यविषयः। किन्तु काव्यात् आनन्दलाभस्तु सर्वजानुभवसिद्धः। तत्तु बालोऽपि जानाति। अतः काव्यप्रयोजनविषये सारमेव दर्शयति वागीशमहोदयो यथा–

**प्रयोजनमानन्दः काव्यस्य** (*काव्यकौमुदी* १/१)इति।

अर्थात् काव्यस्यपरमप्रयोजनं तु आनन्द एव! गौणरूपेण धर्मादिलाभ इति कथने न बाधा!

### ❑ विविधलक्षणप्रसङ्गे *काव्यकौमुद्याः* स्वतन्त्रता।

नाटकलक्षणप्रसङ्गे साहित्यदर्पणे कथ्यते यथा–

**नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।**
**विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः।।** इत्यादयः (*साहित्यदर्पणः* ६/७)

अर्थात् नटः, विदूषकः, पारिपार्श्विक इत्येते सूत्रधारेण सहिताः युक्ताः सन्तः स्वकार्योत्थैः स्वस्वकर्तव्यविषयम् आश्रित्य एव उपयुक्ताः प्रकृतं दृश्यकाव्यविषयम् आक्षिपन्ति, सूचयन्ति इति। तैः तथोक्तैः चित्रैः बहुविधैः वाक्यैः यत्र मिथः अन्योन्यम् संलापं सम्यग् भाषणं क्रियते तत्तु आमुखम् इति कथ्यते। प्रकृताभिनयस्य प्रारम्भे विधेयत्वात् इति भावः।

किन्तु हरिदासविद्यावागीशमहोदयस्तु प्रस्तावनविषये भूतार्थम् एव कथयति यथा– **कविकथाप्रसङ्गेन प्रस्तुतस्य नाटकस्य उद्भावनं पात्रविशेषप्रवेशसूचनं प्रस्तावना**[15] (*काव्यकौमुदी,* द्वितीया कला) इति। अर्थात् सूत्रधारादयः नाटकादौ कविपरिचयं प्रददति, तेन कविपरिचयप्रसङ्गेन अभिनेयस्य नाटकस्य पात्राणां प्रवेशसूचनं क्रियते तर्हि सा

15 उद्घात्यकः कथोद्घातः प्रयोगातिशयस्तथा।
प्रवर्त्तकावलगिते पञ्च प्रस्तावनाभिदाः।। (*साहित्यदर्पणे* ६/३३)

प्रस्तावना इति कथ्यते। एवं प्रस्तावनाविषये वागीशमहोदये किञ्चित् पारतन्त्र्यं दृश्यते।

एवञ्च महाकाव्यं कीदृशं भवेदिति विषये वागीशमहोदयः सूत्ररूपेण प्रस्तौति यथा–

(१) **आशीर्नमस्कारो वस्तुनिर्देशो वा प्रथमे** (*काव्यकौमुदी,* ३/१०)

(२) **एको धीरोदात्तनायकस्ते बहवोऽपि वा** (*काव्यकौमुदी,* ३/११)

(३) **शान्तवीरशृङ्गाराणामन्यतमः प्रधानरसः** (*काव्यकौमुदी,* ३/१२)

(४) **परिच्छेदे सर्गशब्दः** (*काव्यकौमुदी,* ३/१४)

(५) **प्रायेण सर्गसमाप्तिर्गद्येन** (*काव्यकौमुदी,* ३/१७)

(६) **अष्टान्यूनास्त्रिंशदनधिकाश्च सर्गा भाव्यार्थसूचकाः** (*काव्यकौमुदी,* ३/१८)इति सूत्रार्थस्तु स्पष्टमेवास्ति।

महाकाव्यलक्षणविषये विश्वनाथेन उक्तं तु यथा–

**सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः**[16]**।**
**सद्वंशः क्षत्रियो वापि**[17] **धीरोदात्तगुणान्वितः॥**
**एकवंशभवा भूपाः कुलजा बहवोऽपि वा।**
**श्रृंगारवीरशान्तनामेकोऽङ्गी रस इष्यते॥**
**अंगानि सर्वेऽपि रसाः सर्वे नाटकसंधयः।**
**इतिहासोद्भवं वृत्तमन्यद् वा सज्जनाश्रयम्॥**
**चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्।**
**आदौ नमस्क्रियाशीर्वा वस्तुनिर्दश एव वा॥**
**क्वचिन्निन्दा खलादीनां सतां च गुणकीर्त्तनम्।**
**एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः॥**
**नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह।**
**नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते॥**
**सर्गान्ते भाविसर्गस्यकथायाः सूचनं भवेत्।**
**सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः॥**
**प्रातर्मध्याह्नमृगयाशैलर्त्तुवनसागराः।**
**संभोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः॥**
**रणप्रयाणोपयममन्त्रपुत्रोदयादयः।**
**वर्णनीया यथायोगं सांगोपांगा अमी इह॥**
**कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा।**
**नामास्य सर्गोपादेयकथया सर्गनाम तु॥** (*साहित्यदर्पणः* ६/३१५–३२५) इति।

---

16 सुरो देवताप्रकृतिः।
17 अपिना क्षत्रियेतरजातिरपि गृह्यते।

उभयत्र प्रायः सादृश्यं दरीदृश्यते। केवलं वागीशमहोदयनये महाकाव्यानां सर्गसमाप्तिः गद्येन[18] भवति यथा *नैषधचरिते* इति। किन्तु विश्वनाथमते तु सर्गसमाप्तिः भिन्नेन छन्दसा कर्तव्येति। परन्तु अत्रापि सादृश्यमेवास्ति। यतोहि वागीशमते सर्गस्यान्तिमवाक्येन समाप्तिः भवति, अर्थात् सर्गस्य अन्तिमवाक्यमेव समाप्तिसूचकम्, न तु अन्तिमपद्यमिति। विश्वनाथनये तु अन्तिमच्छन्दसा पद्येन वा सर्गसमाप्तिः इति स्वीक्रियते चेन्न वैमत्यम्।

❑ **काव्यदोषलक्षणविचारो वागीशमते।**

आदौ आचार्यभामहः काव्यदोषपरिहाराय निर्दिष्टवान्। तेन उक्तं यत्–

**सर्वथा पद्यमप्येकं न निगद्यमवद्यवत्।**
**विलक्ष्मणा हि काव्येन दुःसुतेनेव निन्द्यते** (*काव्यालङ्कारः* १/११) इति।

काव्यदोषलक्षणप्रसङ्गे *काव्यकौमुद्यामुक्तं* यत्—**अपकर्षकाः काव्यस्य दोषाः** (*काव्यकौमुदी* १०/१) इति। दोषलक्षणप्रसङ्गे भट्टमम्मटेन च विश्वनाथेन समं वागीशमहोदयस्य सादृश्यं दृश्यते। मम्मटभट्टेनोक्तम्—

**काव्यदोषाः**
**पददोषाः पदांशगतदोषाः नाक्यदोषाः अर्थदोषाः रसदोषाः**
**मुख्यार्थहतिदोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः।**
**उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः।।** (*काव्यप्रकाशः*, ७/४९) इति।

मम्मटभट्टमतेनापि काव्यस्य विशेषतया रसस्यापकर्षजनका दोषा इति। स च मुख्यतया त्रिविधो यथा शब्दगतः,अर्थगतः, रसगतश्चेति। वागीशमतेऽपि काव्यदोषा[19] प्राधान्येन त्रिविधा यथोक्तम्—**ते च दोषाः शब्दार्थरसवृत्तयस्त्रिधा** (*काव्यकौमुदी* १/२) इति। एवं विश्वनाथेन दोषसंज्ञाविषये उक्तम् यथा—**रसापकर्षका दोषाः** (*साहित्यदर्पणः*, ७/१) इति।




तस्य मतेनापि दोषाः पञ्चधा मताः यथा चित्रे प्रदर्शितमुपरि।

विश्वनाथकृतकाव्यदोषलक्षणेऽपि भट्टमम्मटकृतकाव्यदोषलक्षणस्य प्रभावस्तु स्पष्ट एवास्ति।

---

18 छन्दोबद्धं पदं पद्यं गद्यञ्च तदितरत् (*काव्यकौमुदी*, ३/३) इति।

19 समुदायेन दोषा अष्टदशविधा इति (*काव्यकौमुदी*, १०/२) इति।

20 ध्वनिसिद्धान्तस्य उद्भवात् प्राक् प्राचीनैः आलङ्कारिकैः गुणाः शब्दार्थयोः शोभावहा धर्माः कथिताः। ध्वनिवादिभिः आचार्यैः ते रसस्य नित्यधर्मा मताः। तदुक्तं ध्वनिकृता यथा—**तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः** इति।

## ❑ काव्यगुणलक्षणविचारो वागीशमते।

काव्यस्य गुणानां[20] सामान्यसंज्ञानिरूपणं वागीशमहोदयेन पृथक्तया कृतम्। अनन्तरं गुणानां विशेषसंज्ञानिरूपणमपि तेन कृतमस्ति। गुणरीत्यतङ्काराः काव्यस्य शोभावर्धकधर्मा इति तस्य सामान्यमतम्। अतस्तेनोक्तम्—**उत्कर्षकाश्च गुणरीत्यलङ्काराः** (*काव्यकौमुदी* १०/१) इति। अत्रवागीशमहोदय आचार्यमम्मटविश्वनाथाभ्यां न स्वतन्त्रः। आचार्यमम्मटमते गुणो यथा–

**ये रसस्याङ्गिनो धर्माः शौर्यादयइवात्मनः।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः।।** (*काव्यप्रकाशः,* ८/६६) इति।

अर्थाद् आत्मनः शौर्यादय[21] इव ये अचलस्थितो धर्माः अङ्गिनो रसस्य[22] उत्कर्षहेतवो भवन्ति ते गुणाः इति मम्मटभट्टस्य मतम्। यथा शौर्यादयो धर्मा जीवात्मनः, न तु शरीरस्य, लोके मृतशरीरे तद्दर्शनाभावात्। तथैव माधुर्यादयो धर्मा अपि रसस्यैव, न तु वर्णानाम्। ते च रसं विना नावतिष्ठन्ते, अवस्थिताश्चावश्यं रसामेव उपकुर्वन्ति। एवञ्च रसोत्कर्षकत्वे सति रसाव्यभिचारिस्थितत्वम्, अव्यभिचारेण रसोपकारकत्वं चेति गुणस्य लक्षणं मम्मटमते। तेषां गुणानां संख्याविषये कथ्यते यत्—

**माधुर्यमोजःप्रसादाख्यास्त्रयस्ते न पुनर्दश** (*काव्यप्रकाशः,* ८/८९) इति।

भरतमुनिवामनदण्डयाद्याचार्याणां मते काव्येषु गुणानां संख्या दश इति। तथाहि दण्डिना अगादि–

**श्लेषः प्रसादः समता माधुर्यं सुकुमारता।**
**अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः॥**
**इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः।**
**एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि॥** (*काव्यादर्शः*) इति।

विश्वनाथेन गुणविषये उच्यते–

**रसस्याङ्गिनो धर्माः शौर्यादयो यथा।**
**गुणाः** (*साहित्यदर्पणः,* ८/२) इति।

लोके यथा आत्मन उत्कर्षहेतुत्वात् शौर्यादयो गुणशब्दवाच्यास्तथा काव्यजगति अङ्गित्वमाप्तस्य रसस्य उत्कर्षाधायका धर्मा माधुर्यादयो गुणा इत्युच्यन्ते। समवायेन रसमात्रधर्मत्वं गुणत्वमित्यर्थः। विश्वनाथमतेऽपि ते गुणाश्च त्रयः सन्ति। यथा माधुर्यम्, ओजः, प्रसादश्चेति।

वागीशमहोदयेन गुणानां विशेषसंज्ञानिरूपणं कृतं यथा—**उत्कर्षाधायको रसस्य धर्मो गुणः** (*काव्यकौमुदी,* ११/१) इति। अर्थाद् गुणस्तु रसस्य धर्मः, किञ्च गुणाः

21 शौर्यं ज्ञानविशेषः। स च चेतनस्य आत्मनो जीवात्मन एव, न तु अचेतनस्य शरीरस्येत्यर्थः।

22 विभावादिकृतश्चमत्कारानन्दमयः सहृदयानुभवो रसः (*काव्यकौमुदी,* ७/२)इति।

काव्येषूत्कर्षतां वर्धयन्ति, अतिशयेन काव्यं शोभयन्तीति भावः। अत्र तु स्पष्टमेवास्ति यद्वागीशमहोदय आचार्यम्मटविश्वनाथाभ्यां प्रभावितः। गुणानां संख्याविषयेऽपि तथैव च। यथा वागीशमहोदयेनापि गुणानां त्रैविध्यं स्वीक्रियते। उक्तिस्ते *काव्यकौमुद्याम्*–

१. **सुगमः प्रसादः**[23] (*काव्यकौमुदी,* ११/२)

२. **माधुर्यमाह्लादः**[24] (*काव्यकौमुदी,* ११/३)

३. **चित्तविस्फोट** ओजः[25] (*काव्यकौमुदी,* ११/४)

अत्र सूत्राणार्थस्यु स्पष्टमेवास्ति।

## ❑ काव्यरीतिलक्षणविचारो वागीशमते

वागीशमहोदयस्य मते गुणरीत्योर्मध्येऽस्ति कश्चित्सम्बन्धः। स च सम्बन्धः पतिपत्न्योरिव। उक्तञ्च तेन यथा— **पतिपत्न्योरिव गुणरीत्योः सहभावेनावस्थानाद् गुणनिरूपणानन्तरं रीतिं निरूपयति** (*काव्यकौमुदी,* दशमी कला) इति।

*साहित्यदर्पणे* रीतिविषये उक्तम् यत्— **पदसंघटना रीतिरङ्गसंस्थाविशेषवत्।** (*साहित्यदर्पणः,* ९/१) इति। अङ्गसंस्थाविशेषवत् शरीरे यथास्थाने विलक्षणमुखाद्यवयवसन्निवेशविशेषवत् शब्दार्थशरीरे काव्ये यथास्थाने पदानां पदविरीषाणां माधुर्यादिगुणव्यञ्जकवर्णादिरूपाणाम् इत्यर्थः। पदसंघटना सन्निवेशः रीतिस्तत्पदवाच्या अर्थात् रीयते ज्ञायते गुणानां निवेशोऽनयेति रीतिः[26]। सा च पदसंघटना, विन्यास इत्यर्थः। यथा अङ्गसंघटना आत्मन उपकर्त्री तथैव पदसंघटना रसस्योपकर्त्री। सा च रीतिश्चतुर्धा यथा वैदर्भी,गौडी, पाञ्चाली च लाटीति। तदुक्तमपि दर्पणे—

**उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा।**
**वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा।।** (*साहित्यदर्पणः,* ९/१) इति।

एवञ्च रीतीनां लक्षणप्रसङ्गेऽपि आचार्यविश्वनाथस्य प्रभावोऽवलोक्यते वागीशमहोदये। यथा वागीशमहोदयो रीतीनां लक्षणं कथयति यत्— **पदयोजना रीतिङ्गयोजनवत्** (*काव्यकौमुदी,* १२/१) इति। अर्थात् यथा देहे करचरणाद्यङ्गसन्निवेशस्तथा काव्यशरीरे वाक्ये सुप्तिङन्तरूपपदसन्निवेशो रीतिरिति। सा च चतुर्धा यथा–

**वैदर्भी गौडी पाञ्चाली लाटी च।** (*काव्यकौमुदी,* १२/२) इति।

रीतीनां विशेषलक्षणान्यपि वागीशमहोदयेन प्रदत्तानि। तेषु लक्षणेषु आचार्यविश्वनाथस्य भूयशः प्रभावो दृश्यते। हरिदासविद्यावागीशमते रीतीनां लक्षणानि यथा–

---

23 चित्तं व्याप्नोति यः क्षिप्तं शुष्केन्धनमिवानलः।
स प्रसादः समस्तेषु रसेषु रचनास्तु च।। (*साहित्यदर्पणे* ८/७) इति।

24 चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते। (*साहित्यदर्पणे* ८/२) इति।

25 ओजश्चितस्य विस्फाररूपं दीप्तत्वमुच्यते। (*साहित्यदर्पणे* ८/४) इति।

(१) **सुगमा वैदर्भी** (*काव्यकौमुदी,* १२/३)
(२) **दीर्घसमासा महाप्राणवर्णा च गौडी** (*काव्यकौमुदी,* १३/४)
(३) **अदीर्घसमासा मधुरा कोमला (अमहाप्राणा) च पाञ्चाली** (*काव्यकौमुदी,* १२/५)
(४) **मृदुपदबहुला लाटी** (*काव्यकौमुदी,* १२/६) इति।

**❑ काव्यालङ्कारलक्षणविचारो वागीशमते**

काव्येष्वलङ्कारलक्षणविषये भट्टमम्मटोक्तिस्तु यथा–

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः**।। (*काव्यप्रकाशः,* ८/६७) इति।

अर्थात् यथा हारादयः कण्ठाद्यङ्गानाम् अतिशयाधानद्वारेण आत्मनोऽप्युपकारकाः, तथैव शब्दार्थद्वारेण ये कदाचित् सम्भाविनं रसमुपकुर्वन्ति, न तु सर्वदैव तेऽनुप्रासोपमादयोऽलङ्कारा इति व्यवह्रियन्ते।

तथा च विश्वनाथेनापि अलङ्कारलक्षणमुक्तं यथा–

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।**
**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्**।। (*साहित्यदर्पणः,* १०/१) इति।

अर्थाद् यथा अङ्गदादयः शरीरशोभातिशायिनः शरीरिणमुपकुर्वन्ति, तथानुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेरुकारकाः। अलङ्कारा अस्थिरा इति नैषां गुणवदावश्यकी स्थितिरिरिति विश्वनाथमतम्।

एवञ्च वागीशमहोदयेनालङ्कारलक्षणं प्रस्तूयते यथा–

**शब्दार्थयोः सौन्दर्यसम्पादको धर्मोऽलङ्कारः**। (*काव्यकौमुदी,* १३/१) इति।

अर्थाद् अलङ्काराः शब्दार्थयोः सुन्दरतां सम्पादयन्ति, शोभां वर्धयन्ति, चमत्कारितां विदधतीति वागीशमतम्। वस्तुतोऽत्र वागीशमहोदयः किञ्चित् स्वतन्त्रोऽलङ्कारलक्षणप्रसङ्गे। यतोहि अलङ्काराः रसादेरूपाकारका इत्यादिकं तल्लक्षणान्नैव बुध्यते। केवलं शब्दार्थयोः सौन्दर्यसम्पादकधर्मत्वमेवलाङ्कारत्वमिति वागीशमतिः।

एवञ्चान्यत्रालङ्काराणां लक्षणप्रसङ्गे तु ताभ्यामाचार्याभ्यां समं सादृश्यमस्ति वागीशमहोदयस्य। तत्र कानिचनालङ्कारलक्षणानि उदाह्रियन्तेऽधः–

(१) **वाच्यं सादृश्यमुपमा**[27] (*काव्यकौमुदी,* १५/१)
(२) **उपमेय उपमानत्वारोपो रूपकम्** (*काव्यकौमुदी,* १५/१२)
(३) **उपमेय उपमानसंशयः सन्देहः** (*काव्यकौमुदी,* १५/२०)
(४) **सादृश्येन भ्रान्तौ भ्रान्तिमान्** (*काव्यकौमुदी,* १५/२१)

---

26 रीतिवादस्य प्रवक्ता तु वामनाचार्यः। *काव्यालङ्कारसूत्रवृत्तिग्रन्थे* उक्तम्–विशिष्टा पदरचना रीतिः इति।
27 साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः (*साहित्यदर्पणः* १०/१५)

(५) **उपमेयनिषेधेनोपमानस्थापनमपह्नुतिः** (*काव्यकौमुदी,* १५/२३)

(६) **उपमेयस्योपमानत्वे सम्भावनोत्प्रेक्षा** (*काव्यकौमुदी,* १५/२६)इति। उत्प्रेक्षालङ्कारे सम्भावनार्थकाः शब्दानां वागीशमहोदयेन संकलनं कृतं यथा-

**इव किं नु ध्रुव शङ्के मन्ये नूनञ्च निश्चितम्।**
**धारणा प्राय इत्येवं शब्दाः सम्भावनार्थकाः।।** (*काव्यकौमुदी,* १५/२६)

कारिकायाः अस्याः सादृश्यमस्ति दर्पणस्यैकेन श्लोकेन। तथाहि उक्तं दर्पणे-

**मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः।**
**उत्प्रेक्षाव्यञ्जकाः शब्दा इवशब्दोऽपि तादृशः।।** (*साहित्यदर्पणः*) इति।

एवमित्यादिषु स्थलेषु तु स्पष्टमेवास्ति तयोराचार्ययोः सादृश्यमिति।

**❑ काव्यभेदविषये स्वतन्त्रता**

काव्यभेदविषये मम्मटस्य प्रभावः कौमुद्यां दरीदृश्यते। यथा मम्मटेन उत्तममध्यमाधमभेदात् काव्यं त्रिविधमिति कथ्यते तथैव हरिदासमहोदयोऽपि ध्वनिप्राधान्ये उत्तमकाव्यम्। तल्लक्षणमाह-**वाच्यार्थादधिकचमत्कारकारिणि व्यङ्ग्यार्थे ध्वनिः** (*काव्यकौमुदी* ४/१) इति। मम्मटेनोक्तम्—**इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः** (*काव्यप्रकाशः,* १/४) इति। गुणीभूतव्यङ्ग्यप्राधान्ये मध्यमकाव्यम्। तल्लक्षणाह-**वाच्यार्थादनुत्तमे व्यङ्ग्यार्थे गुणीभूतव्यङ्ग्यम्** (*काव्यकौमुदी* ५/१) इति। मम्मटमते गुणीभूतव्यङ्ग्यस्वरूपं यथा—**अतादृशि[28] गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्** (*काव्यप्रकाशः,* १/३) इति। गुणीभूतव्यङ्ग्यस्याष्ट भिदा यथा वागीशमहोदयमते




एवम् इतराङ्गादीनि अष्टौ गुणीभूतव्यङ्ग्यस्य उदाहरणानि।

व्यङ्ग्यरहिते चाधमकाव्यम्। अधमकाव्यनिर्णयप्रसङ्गे वागीशमहोदयः स्वतन्त्रः। तेन उक्तं यत् **अव्यङ्ग्यञ्चाधमम्** (*काव्यकौमुदी,* ५/११) इति।

अत्र अव्यङ्ग्यपदस्यार्थस्तु **सर्वथा व्यङ्ग्यार्थरहितमिनि**। वागीशमहोदयस्य अधमकाव्यलक्षणं तु सुधीभिश्चिन्त्यम्। मम्मटभट्टेनोक्तम् अधमकाव्यविषये यथा—**शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्** (*काव्यप्रकाशः,* १/५) इति। मम्मटनये अव्यङ्ग्यपदस्यार्थस्तु स्फुटप्रतीयमानार्थरहित इति। तदुक्तं यथा **अव्यङ्ग्यं स्फुटप्रतीयमानार्थरहितमिति**। अत्र वागीशकृते प्रत्येकं काव्यभेदे काव्यसंज्ञायाञ्च भट्टमम्मटस्य प्रभावो भूयशो दरीदृश्यते।

---

28 वाच्यादनतिशायिनि

## ❑ काव्यसंज्ञानिर्णयविषये *काव्यकौमुद्याः* स्वतन्त्रता

अर्वाचीनकाव्यसंज्ञानिरूपणात्प्रागवश्यमेव प्राचीनकाव्यसंज्ञा सयुक्ति खण्डनीया हरिदासमहोदयेनापि तथा क्रियते। मम्मटस्य काव्यलक्षणं तु—**तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि** (*काव्यप्रकाशः,* १/१) इति। अत्रादोषयोः शब्दार्थयोः काव्यत्वे।

**आपतन्तममुं दूरादुरीकृतपराक्रमः।**
**बलोवलोकयामास मातङ्गमिव केशरी**।। इति

माघश्लोके केशरी मातङ्गमिव अवलोकयति, बलस्त्ववलोकयामासेति कालभेदाद् भग्नप्रक्रमतादोषेण काव्यत्वं न स्यात्। किन्तु सुधीभिस्तु अस्य श्लोकस्य काव्यत्वं स्वीक्रियते। वस्तुतस्तु अदुष्टं काव्यमेव न सम्भवत्येव लोके। अतो भट्टमम्मटेनोक्ते काव्यलक्षणे सङ्गतिरेव न दृश्यते। किञ्च भट्टमम्मटकृतकाव्यलक्षणं तु साहित्यदर्पणकारो विश्वनाथाचार्योऽपि सयुक्ति खण्डयामास। अतो मम्मटाचार्यस्य काव्यलक्षणमग्राह्यमेवेति वागीशमतम्।

अपरञ्च **वाक्यं रसा**[29] **त्मकं काव्यम्** (*साहित्यदर्पणः,* प्रथमपरिच्छेदः) इति दर्पणकारकृतकाव्यलक्षणमङ्गीक्रियते चेद् अर्थात् रसात्मकवाक्यस्यैव काव्यत्वे।

**उदेति सविता ताम्रस्ताम्र एवास्तमेति च।**
**सम्पत्तौ च विपत्तौ च महतामेकरूपता**।। इति

इत्यादीनां नीरसानां प्रबन्धान्तर्गतानां काव्यत्वं न स्यात्। अतो काव्यलक्षणद्वयमपि नेष्टसाधनकृत्।

तस्मात् खलु हरिदासमहोदयेन नवीनं काव्यलक्षणं प्रस्तूयते यथा— **मनोहारिणौ शब्दार्थौ काव्यम्** (*काव्यकौमुदी,* १/२) इति। अत्र शब्दपदेन क्रियापदमपि आक्षिप्यते इति। मनोहारिशब्दार्थघटितं वाक्यं काव्यमिति काव्यलक्षणम्। मनोहारित्वञ्च रसमाधुर्येणालङ्कारसौन्दर्येण भाववैचित्र्यादिना च रसिकाह्लादकत्वञ्च। श्रोत्रियजरन्मीमांसाकादीनाञ्च रसिकत्वाभावात्तदाह्लादकत्वाभावेपि न क्षतिः। एवमत्र विचार्यते चेत् मनोहारिपदे विश्वनाथस्य काव्यलक्षणस्य प्रभावो दृश्यते। किञ्च शब्दार्थाविति पदे च मम्मटाचार्यस्य प्रभावो ज्ञायते। अर्थात् काव्यं न केवलं शब्दमात्रमिति, अपि तु शब्दार्थविशिष्टं काव्यम् भवतीति मम्मटादिस्वीकृतवर्त्मनि एव विचरति वागीशमहोदयः। अतो हरिदासकृतकाव्यलक्षणं तु तयोराचार्ययोः काव्यलक्षणस्य सारमस्तीति वक्तुं शक्यते। वागीशमते मनोहारित्वाभावे काव्यत्वं नैव फलति यथा—

**गौरपत्यं बलीवर्द्दो घासमत्ति मुखेन सः।**
**लाङ्गूलं विद्यते चास्य शृङ्गञ्चापि च विद्यते**।। इति

---

29 रस्यते इति रसः इति व्युत्पतियोगाद्भावतदाभासादयोपि गृह्यन्ते।

इत्यादिषु स्थलेषु काव्यत्वं न स्यान्मनोहारित्वाभावादिति भावः।

**❑ काव्यानां वृत्तिविषये *काव्यकौमुदी***




शब्दानां वृत्तिनिरूपणावसरे वागीशमहोदयः पूर्वाचार्याणामेव मतानि समर्थयति। यथा शब्दास्त्रिविधाः वाचक-लक्षक-व्यञ्जकाः इति। अर्थाः अपि त्रिधा वाच्य-लक्ष्य-व्यङ्ग्याः। एवञ्च वृत्तयोऽपि त्रिधा यथा **अभिधा-लक्षणा-व्यञ्जनाश्चेति**। वृत्तीनां लक्षणानि उक्तानि यथा—**मुख्यार्थबोधिका शब्दस्य शक्तिरभिधा** (*काव्यकौमुदी* ६/१) इति। *साहित्यदर्पणे* अभिधाविषये कथितम् - **तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा** (*साहित्यदर्पणः*, २/४) इति। संकेतितार्थः[30] तु मुख्यार्थ एव। लक्षणाविषये उक्तम्— **मुख्यार्थबाधे तत्सम्बन्धिन्यर्थबोधिका लक्षणा** (*काव्यकौमुदी* ६/२) इति। अत्र लक्षणे लक्षणायाः कृत्स्नसोपानं न दर्शितम्। *साहित्यदर्पणे काव्यप्रकाशे* च लक्षणाविषये उक्तं यत् लक्षणायाः कृते सोपानत्रयमपेक्षितम्। यथा मुख्यार्थबाधा इति प्रथमसोपानम्, मुख्यार्थसम्बन्धी इति द्वितीयसोपानम्, अन्यञ्च तृतीयसोपानं रूढिः वा प्रयोजनम् इति। किन्तु *काव्यकौमुद्यां* तृतीयसोपानं स्पष्टतया नोक्तमिति। इदं तु विद्वद्भिरेव विचार्यमस्ति। अपरञ्च *साहित्यदर्पणे* गदितं लक्षणाविषये—

**मुख्यार्थबाधे तद्युक्तो यायान्योऽर्थः प्रतीयते।**
**रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता।।** (*साहित्यदर्पणः*, २/५) इति।

एवञ्च व्यञ्जनाविषये कथितम्— **वाच्यलक्ष्येतरार्थबोधिका व्यञ्जना** (*काव्यकौमुदी* ६/३) इति। एवञ्च व्यञ्जनाविषये उक्तं यत् **व्यञ्जनां विना रसादीनां न प्रतीतिः** (*काव्यकौमुदी* ६/१) इति। एवञ्च व्यञ्जनाविषये *दर्पणे* उक्तम्—

**विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः।**
**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।।** (*साहित्यदर्पणः*, २/१२) इति।

अत्रेदमवधेयं यत् शब्दानां वृत्तिनिर्णयविषये मम्मटेन समं विश्वनाथस्य भूयशः सादृश्यं दरीदृश्यते इति। किञ्च विश्वनाथेन सह हरिदासमहोदयस्यापि अस्ति सदृशता। तस्मात् शब्दानां वृत्तिविषये नास्ति मतपार्थक्यं वागीशमहोदयस्य पूर्वाचार्यैः विशेषतया आचार्यमम्मटविश्वनाथाभ्यामिति।

---

30 येन केन प्रकारेण वाऽस्तु संकेतितार्थो मुख्यार्थान्नातिरिच्यते इति *साहित्यदर्पणस्य* लक्ष्मीटीकायाम्।

### ❑ काव्ये रसादीनां स्थितिविषये वागीशमहोदयः

हरिदासमहोदयस्य मतं तु **रस एव सारः काव्ये** (*काव्यकौमुदी* ७/१) इति। ननु को नाम रस इति चेदाह वागीशमहोदयो यथा—विभावा[31] **दिकृतचमत्कारानन्दमयः सहृदयानुभवो रसः** (*काव्यकौमुदी* ७/२) इति। एवं काव्ये सारो धर्मान्तरापोक्षया श्रेष्ठः पदार्थः। तथा च शब्दः काव्यस्य शरीरम्, अर्थः खलु आत्मा, रसादिः प्राणोपमः सारः, गुणाः शौर्यादयः, अलङ्कारस्तु कटककुण्डलादिवत्, दोषाश्च काणत्वमुर्खत्वादिवत्। ननु विश्वनाथेनोक्तं **रस एवात्मा साररूपतया जीवनाधायको यस्य** (*साहित्यदर्पणस्य* प्रथमपरिच्छेदे) इति। काव्यस्यात्मा रस इति। वागीशमहोदयस्तु अर्थस्य आत्मत्वं कथयति, अस्ति किं विषयेऽस्मिन् पूर्वाचार्याणां काचिद्भणितिरिति? तत्रौच्यते अर्थस्यात्मत्वं न केवलं वागीशमहोदयेन, अपि तु प्राचीनैप्यङ्गीकृतमस्ति यथा—

**योऽर्थः सहृयश्लाघ्यः काव्यात्मेति व्यवस्थितः।**
**वाच्यप्रतीमानार्थौ तस्य भेदावुभौ स्मृतौ।** (*ध्वन्यालोकः,* प्रथमोद्योतः)इति।

एवं रसादीनां स्थितिविषये वागीशमहोदयः प्रायः ताभ्यामाचार्याभ्यां स्वतन्त्रोस्तीति वक्तुं न शक्यते।

### ❑ काव्येषु दशविधाः रसाः न तु नवविधाः

रसानां संख्याविषये अस्ति पृथक् मतं वागीशमहोदयस्य। तन्मते काव्येषु रसानां संख्या नापि अष्टौ नापि नव, अपि तु दश। यथोक्तम्—**स चात्र दशधा** (*काव्यकौमुदी* ७/३) इति। तस्य मते वत्सलनामकः अपि एकः अधिकरसः अस्ति। तदुक्तं यथा—

**शृङ्गारो वीरः शान्तश्च रौद्रः करुण एव च।**
**हास्यो भयानकश्चैव बीभत्सोद्भुतवात्सलाः।।** (*काव्यकौमुदी* ७/५) इति।

एवमेव दश स्थायिभावा अपि प्रतिपादिताः। स्थायिभावविषये तेनागादि—**यावदनुभवमव्याहतो भावः स्थायी** (*काव्यकौमुदी* ७/५) इति। स्थायिभावानां संख्याविषये उक्तम्—

**रागोत्साहशमक्रोधशोकहासभयानि।**
**जुगुप्साविस्मयस्नेहाः स्थायिभावाः दश स्मृताः।।**
(*काव्यकौमुदी,* सप्तमी कला) इति।

अत्र न केवलं वात्सलरसः अस्तीति उक्तम्, अपि तु वात्सलरसस्य पृथक्तया रसरूपेण गणनायै तेन वात्सलरसस्य स्थायिभावादीनामपि उल्लेखः कृतः। यथा वत्सलरसस्य स्वरूपविषये उक्तम्—**स्नेहस्थायिभावो वत्सलः** (*काव्यकौमुदी* ७/२१) इति। वत्सलरसस्य आलम्बनविभावः पुत्रादयः, उद्दीपनविभावः तदीयचेष्टादयः, अनुभावः अङ्के धारणादयः,

---

31 यावदनुभवमव्याहतो भावः स्थायी (*काव्यकौमुदी,* ७/५)इति।

व्यभिचारिभावः गर्वादयश्चेति।

एवं वात्सलरसस्य उदाहरणमपि प्रस्तौति स्वकृतितः-

**उत्सङ्गसुप्ता चुचुकं पिबन्ती**
**स्ववक्त्रचुम्बार्थमधः कृते सा।**
**चपेटपातैरपि तत्कपोले**
**धनोति धन्यां जननीं स्म कन्या।।** इति (*रुक्मिणीहरणमहाकाव्यम्*)

अस्मिन् पद्ये वत्सलरसो विद्यते। *काव्यकौमुदी*ग्रन्थेऽस्मिन् पृथक्तया वात्सलरसस्य स्थापनापि कृतास्ति। यत्तु तयोर्ग्रन्थयोर्मध्ये नास्ति इति रसविषये अस्मिन् ग्रन्थे विशेषतास्ति।

एवमन्यत्रापि भूयशः सादृश्यं वैसादृश्यञ्चापि अस्ति पदे पदे। अत्र साररूपेण केचन बिन्दव एव उक्ताः इति शिवमस्तु।

## ❑ उपसंहारः

पद्मभूषणविभूषितो महामहोपाध्यायो विद्यावागीशो हरिदाससिद्धान्तवागीशमहोदयस्तु संस्कृतजगति लब्धकीर्तिः विद्वान्। तस्य पाण्डित्यं न केवलं काव्येषु, अपि संस्कृतस्य प्रत्येकं शास्त्रे तस्य बाधाहीनः प्रवेशः सर्वजनविदितः। असौ सहृदयशिरोमणिः लोकव्यवहारविदासीत्। अतस्तस्य प्रभावस्तदीयकाव्येषु सर्वत्रैव प्रतिभाति। अस्ति नीरक्षीरज्ञस्यास्य काव्यशास्त्रमेकं *काव्यकौमुदीनामिका*। ग्रन्थोऽयमतीवसरलदेवगिरा विनिर्मितोऽस्ति। ग्रन्थस्यास्यभेदत्रयं कल्पते। यथा सूत्रभागः, वृत्तिभागः, उदाहरणभागश्चेति। अस्मिन् शोधपत्रे ग्रन्थस्यास्य समीक्षणात्मकमेकमध्ययनं कृतं वर्तते। तत्र विशेषतया आचार्यमम्मटभट्टविश्वनाथयोः कीदृशः प्रभावोऽस्ति, वा ग्रन्थोऽयं कियान् स्वतन्त्रः इत्यादिविषये शोधकार्यमत्र यथासामर्थ्यं कृतमस्ति। विशेषतया *काव्यकौमुदीग्रन्थस्य* आचार्यमम्मटविश्वनाथदिशा ग्रन्थस्य नामकरणविचारः, अध्यायविभागविचारः, मङ्गलाचरणविचारः, काव्यप्रयोजनविचारः, विविधलक्षणानां विशेषतया नाटक-दोष-गुण रीति-अलङ्कारादीनां विचारः, काव्यस्य भेद-संज्ञास्वरूप-वृत्त्यादिविचारः, एवमन्ते च काव्ये रसादीनां स्थितिः, रसानां संख्या, विशेषतया वात्सलरसस्य स्थापना च ग्रन्थस्यास्य माहात्म्यं प्रतिपादितमस्ति।

## सहायकग्रन्थाः

१. आचार्यमम्मटभट्टः *काव्यप्रकाशः* सम्पादकः आचार्यरामानन्द, कोलकाता, सस्कृतपुस्तकभाण्डार, प्रथमप्रकाशः वैशाखः १३८४ वङ्गाब्दे।

२. आचार्यविश्वनाथः *साहित्यदर्पणः* सम्पा-कृष्णमोहनशास्त्री, वाराणसी, चौखम्बा संस्कृतसंस्थान, संस्करण २०१२।

३. आचार्यानन्दवर्धनः *ध्वन्यालोकः* सम्पा-सत्यनारायणचक्रवर्ती, कलिकाता, संस्कृतपुस्तकभाण्डार, पुनर्मुद्रण आगस्ट २०१२।
४. कविराजराजशेखरः *काव्यमीमांसा.* सम्पा-नगेन्द्रनाथचक्रवर्ती, शान्तिनिकेतन, विश्वभारती, १९६०।
५. गोविन्दठक्कुरः, *काव्यप्रदीपः,* वाराणसी, चोखम्बा, पुनर्मुद्रण १९८२।
६. दाधीचः, डाँ. रामकुमारः *अलङ्कारशास्त्रेतिहासः* जयपुर, हंसा प्रकाशन, संस्करण २०१९।
७. भट्टवामनाचार्यः *बालबोधिनीटीका.* दिल्ली, परिमल पाब्लिकेशन्स, पुनर्मुद्रित २००८।
८. भट्टाचार्य, विष्णुपद, *काव्यमीमांसा,* कलकाता, संस्कृत बुक डिपो, प्रथम प्रकाश जानुयारि २०१०।
९. भट्टाचार्य, विष्णुपद, *साहित्यमीमांसा,* कलिकाता, विश्वभारती ग्रन्थनविभाग, १३८२।
१०. मुखोपाध्याय, रमारञ्जन, *रससमीक्षा,* कलिकाता, संस्कृतपुस्तकभाण्डार, प्रकाश १३८४।
११. वन्द्योपाध्याय, श्रीसत्यरञ्जन. *संस्कृत अलङ्कार साहित्ये समालोचनार धारा.* कलकाता, संस्कृत बुक डिपो, चतुर्थ संस्करण २०१३।
१२. शर्मा, श्रीरामजीलाल, *काव्यप्रकाशरहस्यम्.* वाराणसी, चौखम्बा सुरभारती प्रकाशन, संस्करण २०२१।
१३. शर्मा, श्रीरामजीलाल. *साहित्यदर्पणालोकः,* वाराणसी, चौखम्बा सुरभारती प्रकाशन, संस्करण २०२१।
१४. साहा, अणिमा. *संस्कृत अलङ्कारशास्त्रे दोषतत्त्व.* कलिकाता, संस्कृत महाविद्यालय गवेषणा ग्रन्थमाला, सारस्वत लाइब्रेरी, प्रकाशः १९७३।
१५. सेनः, शुभ्रजित्. *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् विहङ्गमदृष्ट्या परिशीलनम्.* कलकाता, संस्कृतपुस्तकभाण्डार, प्रकाशः २०१९।
१६. हरिदाससिद्धान्तवागीशः. *काव्यकौमुदीमूलमात्रम्,* प्राप्तिस्थानं संस्कृतसाहित्यपरिषद्, प्रकाशकालः १३६५ तमे वङ्गाब्दे।

# क्त्वान्त-तुमुन्नन्तान्वयि-कर्मणः अभिधानानभिधानविमर्शः

**प्रलयनन्दी**

**सारसंक्षेपः**-कर्मणि अर्थे क्त्वा-प्रत्ययस्य प्रसङ्गे ओदनः पक्त्वा भुज्यते, ओदनं पक्त्वा भुज्यते इति उभयथापि प्रयोगो दृश्यते। तुमुनो विषयेऽपि हरिः पूजयितुं शक्यते, हरिं पूजयितुं शक्यते इत्युभयविध एव प्रयोगः समवलोक्यते। तत्र कस्य प्रयोगस्य साधुत्वं कस्य वा असाधुत्वमिति विषये परस्परं विवदन्ते विद्वांसः। एवं क्त्वा-तुमुनोः प्रकृतिभूतो यो धातुस्तदर्थभूता या क्रिया तत्सम्बन्धिनः कर्मणः कर्मणि प्रयोगे कदा अभिधानं भवेत् कदा च अनभिधानमिति विषये दृश्यते संशयावसरः। कथमत्र निर्वाहः कार्य इति प्रकृतप्रबन्धस्य आलोचनबिन्दुः। अत्र क्त्वा-तुमुनोः कोऽर्थ इति प्रथमतया आलोचितम्, तदनु प्रकृतसमस्याया उपस्थापनं कृत्वा तद्विषये विस्तृतो विचारः प्रस्तुतः। अन्ते भाष्यकारादीनां प्रामाणिकाचार्याणां मतानाम् आलोचनपुरःसरं संक्षिप्तो विमर्शः उपस्थापितः।
**मूलशब्दाः**-क्त्वा, तुमुन्, कर्म, धात्वर्थः, अन्वयः, अभिधानम्।

**भूमिका**-चैत्रः ओदनं पक्त्वा भुङ्क्ते इति वाक्यस्य कर्मणि प्रयोगे ओदनः पक्त्वा भुज्यते चैत्रेण इति स्थितिः। अत्र पचिक्रिया भुजिक्रियेति उभयनिरूपितं कर्मत्वशक्तिद्वयम् एकस्मिन् ओदनपदार्थे वर्तते। अस्यामवस्थायां कर्मणि प्रयोगे भुज्यते इति त-प्रत्ययेन भुजिक्रियानिरूपितस्य कर्मत्वस्याभिधानेऽपि पक्त्वेत्यत्र क्त्वा-प्रत्ययेन पचिक्रियानिरूपितस्य कर्मत्वस्यानभिधानात् ओदन-शब्दात् अनभिहिते कर्मणि द्वितीयायाः प्राप्तिः। क्वचिद् ओदनं पक्त्वा भुज्यते इत्यपि प्रयोगो दृश्यते। तत्र प्रसङ्गे पचिक्रियानिरूपितस्य कर्मत्वस्य अनभिहितत्वेऽपि भुजिक्रियानिरूपितस्य ओदननिष्ठस्य कर्मत्वस्य अभिहितत्वाद् अभिहिते कर्मणि प्रथमायाः प्राप्तिः। एवमेव चैत्रः ओदनं पक्तुं शक्नोतीति वाक्यस्य कर्मणि प्रयोगे चैत्रेण ओदनं पक्तुं शक्यते इति स्थितिः। अत्रापि कर्मणि प्रयोगे शक्नोतिक्रियानिरूपितस्य कर्मत्वस्याभिधानेऽपि ओदननिष्ठस्य कर्मत्वस्यानभिधानात् ओदन-शब्दाद् अनभिहिते कर्मणि द्वितीयाप्रसङ्गः। एवं कर्मण्यर्थे ओदनं पक्तुं शक्यते इति प्रयोगोऽपि दृश्यते। तत्रापि तुल्यरीत्या पचिक्रियानिरूपितस्य कर्मत्वस्य अनभिहितत्वेऽपि शक्नोतिक्रियानिरूपित-स्यौदननिष्ठस्य कर्मत्वस्य अभिहितत्वाद् अभिहिते कर्मणि प्रथमायाः प्रसङ्गः। कथमत्र व्यवस्थितिरिति प्रकृतप्रबन्धस्य विचारबिन्दुः। इमं विषयमाश्रित्य अत्र प्रबन्धे विविधाचार्याणां मतोपस्थापनपुरःसरं संक्षिप्तो विमर्शः प्रस्तूयते।

**प्रत्ययार्थः**-''तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्'' इति क्रियार्थायां क्रियायां द्योत्यायां विधीयमानस्य तुमुनः कोऽर्थ इति अनिर्दिष्टः। यद्यपि ''कर्तरि कृत्[2]'' इति कृत्त्वात् तुमुनः कर्त्रर्थकत्वमेव प्राप्तं तथापि ''तुमर्थे सेसेनसे[3]...'' इत्यादिसूत्रेण विधीयमानानां से-प्रभृतीनां कर्त्रर्थकत्वे सिद्धेऽपि पुनरपि कृतेन तुमर्थग्रहणेन तुमुनः कर्त्रर्थकत्वाभावो ज्ञाप्यते। तदा अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति नियमात् प्रकृत्यर्थकत्वं तुमुनो लभ्यते। तुमुनः प्रकृतिर्धातुर्हि भावार्थकः अतस्तुमुनोऽपि भावार्थकत्वं सिध्यति। ''समानकर्तृकयोः पूर्वकाले[4]'' इति सूत्रेण समानकर्तृकयोः धात्वर्थयोर्मध्ये पूर्वकालीनो यो धात्वर्थः तद्वाचकाद्धातोः क्त्वा-प्रत्ययो विधीयते। अत्र ''तुमर्थे सेसेनसे[5]...'' इत्यादिसूत्रात् तुमर्थग्रहणानुवृत्तेः भावरूपार्थे एव क्त्वो विधानं भवति। अत एव अव्ययकृतो भावे भवन्तीति सिद्धान्तः सम्पद्यते।

विचारः-क्त्वा-प्रत्ययस्य तुमुन्-प्रत्ययस्य च कोऽर्थ इति विषये भाष्यवार्त्तिकयोः मतभेदो दृश्यते। ''तुमर्थे सेसेनसे[6]...'' इत्यादिसूत्रात् तुमर्थग्रहणानुवृतेः भावरूपार्थे तुमर्थे क्त्वा-प्रत्ययः इति भाष्यकारमतम्। ''कर्तरि कृत्[7]'' इति यद्यपि कृत्-संज्ञकानां प्रत्ययानां कर्त्रर्थकत्वं व्यवस्थितम्, तथापि क्त्वो विषये तुमर्थग्रहणानुवृत्तेः तुमुना कर्तरीत्यस्य सम्बन्धाभावो बोध्यः। तुमुनश्च अर्थविशेषनिर्देशाभावात् अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति नियमात् प्रकृतेर्धातोः यो भावरूपः अर्थः स एव तुमुनोऽर्थ इति आशयो लभ्यते। क्त्वा-प्रत्ययविधायके सूत्रे तुमर्थग्रहणानुवृत्तेः क्त्वः अपि भाववाचित्वं लभ्यते। अनया रीत्या क्त्वा-तुमुनोः भावार्थकत्वं बोध्यम्।

वार्त्तिककारस्य मते तु तुमर्थग्रहणानुवृत्तिर्न भवति। अतो णमुलादीनां कृतां कर्तर्येव विधानं स्यात्, ततश्च क्त्वौदनो भुज्यते देवदत्तेन इत्यादौ क्त्वा-प्रत्ययेन कर्तुर्देवदत्तस्य अभिधानात् अनभिहिते कर्तरि तृतीया न स्यात्। अतस्तेन वचनमारब्धम् ''आ च तुमुनः प्रत्ययाः समानाधिकरणे[8]'' इति। आ तुमुन्-प्रत्ययात् णमुलादयः प्रत्यया अनुप्रयोगेण समानाभिधेया एवेति तदाशयः। एवञ्च अनुप्रयोगेण भुज्यते-इत्यनेन कर्मणोऽभिधानात् क्त्वा-प्रत्ययेनापि कर्मण एवाभिधानं न कर्तुरिति कर्तृवाचकात् देवदत्तशब्दात् तृतीया यथा सिध्यति तथा कर्मवाचकाद् ओदन-शब्दात् प्रथमापि सम्पद्यते।

अत्रोभयथापि प्रकारेण क्त्वौदनो भुज्यते देवदत्तेन इति प्रयोगः सिध्यति, परन्तु वार्तिककारोक्तमते दोषं प्रदर्श्य भाष्यकृता तन्मतं प्रत्याख्यायि। क्त्वौदनं गम्यते ग्राम इति प्रयोगेऽपि गम्यत इत्यनुप्रयोगेण कर्मणोऽभिहितत्वात् क्त्वा-प्रत्ययेनापि कर्मणोऽभिधानात् ओदन-शब्दाद् द्वितीया न स्यादिति तत्र दोषः प्रदर्शितः। भाष्यकृन्मते तु क्त्वा-प्रत्ययेन भावरूपस्यैव अर्थस्यप्रकाश इति क्त्वा-प्रत्ययेन ओदननिष्ठस्य कर्मत्वस्यानभिधानाद् भवत्येव द्वितीयेति बोध्यम्।

**अभिधानानभिधानव्यवस्था**–पूर्वं प्रदर्शितेषु स्थलेषु कर्मत्वस्य अभिधानानभिधानयोः प्रसङ्गे संशयः प्रदर्शितः। सम्प्रति तस्मिन् विषये विशिष्टम् आलोचनं प्रस्तूयते।

पक्त्वा ओदनो भुज्यते इत्यादौ क्त्वान्तेन नालेन च युगपत् क्रियाद्वयस्य उपस्थितिर्भवति। क्रियाद्वयस्य उपस्थितेः क्रियाभ्यां निरूपितयोः कर्मत्वशक्त्योरपि उपस्थितिः। तच्च कर्मत्वशक्तिद्वयमत्र एकद्रव्यगतमेव। एकद्रव्यगतयोः तयोः शक्त्योर्मध्ये प्रधानीभूतक्रियानिरूपिताया एकस्याः शक्तेः लकारेणोक्तत्वेऽपि गुणीभूतापरक्रियानिरूपिताया अपरकर्मत्वशक्तेः,अनभिधानमेवेति अनभिहिते कर्मणि द्वितीयाया आपत्तिरिति स्थितिः। अत्र वाक्यपदीये समाधानमुक्तम्–

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते[9]।। इति।

यस्मिन् वाक्ये प्रधानाप्रधानयोः क्रिययोः सम्बन्धिनी एकद्रव्यनिष्ठा पृथक् पृथक् शक्तिर्दृश्यते तत्र अप्रधानक्रियानिरूपिता कर्मत्वादिशक्तिः प्रधानक्रियानिरूपितां शक्तिमनुरुध्यते। अर्थाद् गुणशक्तेरभिधानम् अनभिधानं वा प्रधानक्रियानिरूपितशक्तेरेव अभिधानानभिधानाभ्यां सम्पद्यत इति आशयः। अप्रधानाः प्रधानानुयायिनो भवन्तीति लोके दृश्यते। तद्वद् इह शास्त्रेऽपि गुणानां प्रधानानुयायित्वं व्यवस्थीयते। तेन प्रधानक्रियाविषयीभूतकर्मत्वशक्तेः अभिधाने सति गुणक्रियायां विषयीभूता अनभिहितापि कर्मत्वशक्तिरभिहितवत् प्रकाशते। तदुक्तं–

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते[10]।। इति।

**समाधानान्तरम्**–पक्त्वौदनो भुज्यत इति प्रयोगोपपत्तौ अन्यदपि समाधानं दृश्यते। अस्मिन्मते पाकक्रियायाम् ओदनस्य कर्मत्वेन अन्वयो न भवति, प्रथमान्तपदबोध्यस्यौदनस्य पक्त्वेत्यनेन सह सम्बन्धानर्हत्वात्। एवञ्च केवलया भुजिक्रियया एवौदनस्य सम्बन्धः, ओदने च भुजिक्रियानिरूपिता एकैव कर्मत्वशक्तिरिति लभ्यते। सा च कर्मत्वशक्तिः भुज्यत इति कर्मणि विहितेन लकारेण अभिहितेनि नात्र प्रधानशक्त्यभिधाने गुणक्रियानिरूपितशक्तिरभिहितवत्प्रकाशत इति पूर्वोक्तन्यायस्य प्रसङ्गः। नन्वेवं सति अन्यत्किञ्चित् पक्त्वा ओदनो भुज्यत इति बोधः स्यात्। ततश्च ओदनपाकस्य विवक्षितं भुजिक्रियाङ्गत्वं न प्रतीयेतेति चेदुच्यते नैष दोषः, एकवाक्योपात्तत्वरूपसामर्थ्याद् ओदनस्य पचेरङ्गतया प्रतीतेः। तथाहि प्रथमान्तपदोपस्थाप्यत्वाद् यद्यपि ओदनस्य पाकक्रियया साक्षादन्वयो न सम्भवति तथापि एकवाक्योपात्तत्वरूपसामर्थ्येन स पाकक्रियायाम् अङ्गत्वेन प्रतीयते।

अत्र वस्तुतः अकर्मकपाकक्रियाया अनुपपत्तेः अर्थापत्त्या पाकक्रियायाम् ओदनकर्मणः सम्बन्धो लभ्यते,तत्र उपस्थितत्वाद् ओदनस्यैव कर्मत्वेन अन्वयो नान्यस्येति तत्त्वम्। अत्र

पाकक्रियया साकमोदनस्य एकवाक्योपात्तत्वरूपसामर्थ्यलभ्यः सम्बन्धस्तु पाकभोजनयोः गुणप्रधानभावे सत्येव लभ्यते नान्यथेति अरुचेः प्रथमसमाधानस्यैव न्याय्यत्वं बोध्यम्। **शङ्कासमाधी**-प्रधान-क्रियानिरूपितायाः कर्मत्वादिशक्तेः अभिधाने सति अप्रधानक्रियानिरूपिता अनभिहितापि कर्मत्वादिशक्तिः अभिहितवदेव प्रकाशते इत्यस्ति नियमः। पक्त्वौदनं गम्यते ग्राम इति वाक्ये प्रधानक्रिया गमनम्, अप्रधानक्रिया पाकः। अथ प्रधानगमनक्रियानिरूपितायाः ग्रामनिष्ठकर्मत्वशक्तेः अभिधाने सति अप्रधानपाकक्रियानिरूपितायाः ओदननिष्ठकर्मत्वशक्तेरपि अभिधानेन ओदनशब्दात् प्रथमापत्तिरिति दोषः। एवं शङ्कायां सत्यामुच्यते न हि, कर्मत्वादिशक्तिद्वयं यत्र एकद्रव्यगतं तत्रैव प्रकृतनियमस्य प्रवृत्तिः। प्रकृते प्रधानक्रियानिरूपिता कर्मत्वशक्तिः ग्रामनिष्ठा अप्रधानक्रियानिरूपिता च कर्मत्वशक्तिः ओदननिष्ठेति नात्र प्रकृतनियमस्य प्रवृत्तिः। एवञ्चात्र गम्-धातूत्तरकर्मप्रत्ययेन ग्रामनिष्ठैव कर्मत्वशक्तिरभिहिता, ओदननिष्ठा कर्मत्वशक्तिरनभिहितेति न भवति ओदनशब्दाद् द्वितीयेति निर्वाहो बोध्यः।

**इष्यते ग्रामो गन्तुम्**-अस्मिन् वाक्ये इषिक्रियया गमनं यथा कर्मत्वेनान्वेति तथा ग्रामोऽपि। अत्र सकर्मकगम्-धातुना सह एषणस्य कर्मत्वरूपसम्बन्धाद् इष्-धातोः ग्रामकर्मकगमनरूपकर्मणि अर्थे लकारो विधीयते, अनेन च लकारेण ग्रामरूपस्य कर्मणः अपि अभिधानं भवति। अत्र इषेः ग्रामो गमनञ्चेति कर्मद्वयम्। गमनस्य तु कर्म ग्रामः, सकर्मकस्यैव गमनस्य इषिकर्मत्वात्।



१. अन्वयप्रकारः

अत्र एषणक्रियया कर्मत्वेन अन्वितायां गमनक्रियायां ग्रामस्य विशेषणत्वात् इष्-धातोः विहितेन लकारेण गमनस्य ग्रामस्य चेत्युभयोरपि अभिधानं भवतीति विशेषः। ग्रामरूपकर्मणि इषिनिरूपिताकर्मत्वशक्तिः गमिनिरूपितकर्मत्वशक्तिरिति शक्तिद्वयं विद्यते। तत्र इषिनिरूपितकर्मत्वशक्तौ अभिहितायां गमिनिरूपितकर्मत्वशक्तिरपि अभिहितवत् प्रकाशत इति फलिताशयः।

अथात्र गमनार्थम् एषणमिति गमनक्रियार्थायाम् एषणक्रियायामुपपदे गम्-धातोः तुमुन् भवति। तथा च फलभूता गमनक्रिया प्रधानं न एषणमिति समायातम्। प्रधानक्रियानिरूपितकर्मत्वादिशक्तेः अभिधाने सति अप्रधानक्रियानिरूपिता अनभिहितापि कर्मत्वादिशक्तिः अभिहितवदेव प्रकाशत इति चास्ति नियमः। एवञ्च इष्यते ग्रामो गन्तुमिति प्रकृतोदाहरणे अप्रधानैषणक्रियानिरूपितकर्मत्वशक्तेः अभिधाने अनभिहिताया अपि प्रधानगमनक्रियानिरूपितकर्मत्वशक्तेः अभिहितवत् प्रकाशो दृश्यते। ततश्च अत्र एकद्रव्यनिष्ठायाः

प्रधानक्रियानिरूपितकर्मत्वशक्तेः अनभिधानदशायामपि अप्रधानक्रियानिरूपितकर्मत्वशक्तेः अभिधानाद् उक्तन्यायस्य व्यभिचारदोष आपततिः।

अत्रोच्यते नैष दोषः,एषणे शाब्दप्राधान्यस्य सत्त्वात्। प्राधान्यं द्विविधं भवति—शाब्दम् आर्थञ्च। आख्यातपदवाच्ये अर्थे साध्यत्वेन विधेयत्वात्तत्र यत् प्राधान्यं तच्छाब्दम्। फलत्वस्य उद्देश्यत्वस्य वा आश्रयणाद् यत् प्राधान्यं तद् आर्थप्राधान्यम्। अत्र फलत्वाश्रयत्वाद् गमनस्य यद्यपि आर्थप्राधान्यम्, तथापि आख्यातवाच्याया एषणक्रियायाः साध्यत्वविधेयत्वाभ्यां शाब्दं प्राधान्यं वर्तते। वाक्ये तिङन्तवाच्यक्रियाया एव सर्वत्र प्राधान्यं भवति, तिङन्तोपात्तक्रियानिरूपितायाः शक्तेरेव वस्तुस्वभावमाहात्म्येन स्वसमानाधिकरणेतरशक्त्यभिभावकत्वं दृश्यते। उक्तञ्च यास्काचार्येण ‘‘भावप्रधानमाख्यातम्[11]’’ इति। अत एव पक्त्वौदनं भुङ्क्ते देवदत्त इत्यत्र भोजनक्रियायाः प्राधान्यात् पचिक्रियानिरूपितस्य देवदत्तनिष्ठस्य कर्तृत्वस्य अनभिहितत्वेऽपि न तृतीया, पत्रवौदनो भुज्यते देवदत्तेनेत्यत्र च पचिक्रियानिरूपितस्य ओदननिष्ठस्य कर्मत्वस्य अनभिहितत्वेऽपि न द्वितीयेति बोध्यम्। इत्थमत्रोदाहरणे एषणस्य प्राधान्यम्, प्रधानैणक्रियानिरूपितस्य ग्रामनिष्ठकर्मत्वस्य अभिधानेन अप्रधानगमक्रियानिरूपितायाः कर्मत्वाशक्तेः अनभिधानेऽपि इयम् अभिहितवत् प्रकाशत् इति पूर्वोक्तन्यायस्य न कोऽपि दोषः।

**न्यायपरिधिः**–प्रधानशत्त्यभिधाने गुणक्रियानिरूपितशक्तिरभिहितवत्प्रकाशत इति प्रकृतन्यायस्य न केवलं कर्मकारके प्रवृत्तिरपि तु कारकान्तरेऽपि अस्य सञ्चारो दृश्यते। भुक्त्वा नगरोऽभिनिविश्यते इति प्रकृतम् उदाहरणम्। अत्र अभिनिवेशक्रिया प्रधानभूता, तन्निरूपिता कर्मत्वशक्तिः नगरे वर्तते। भुजिक्रिया गुणक्रिया, तन्निरूपिता अधिकरणत्वशक्तिः नगरे एव विद्यते। अत्र अधिकरणत्वस्य कर्मत्वस्येति उभयोरपि शत्त्योराश्रय एकमेव द्रव्यम्। ततश्चात्र उक्तन्यायात् प्रधानभूतया अभिनिवेशक्रियया निरूपितायाः कर्मत्वशक्तेरभिधानेन गुणभूतया भुजिक्रियया निरूपिता अनभिहितापि अधिकरणत्वशक्तिः अभिहितवत् प्रकाशते।अत एव नगरशब्दात् गुणाक्रियाप्रयुक्तं सप्तमीविभक्तिरूपं कार्यं न भवति। अत्र गुणक्रियाप्रयुक्तायाः सप्तम्या विधाने सति प्रधानक्रियाविषयकर्मत्वशक्तेः प्रतीतिर्न स्यात्, तदा च गुणेन प्रधानविरोधापत्तिः। एतच्च गुणानां प्रधानानुरोधित्वमिति न्यायस्य विरुद्धम्। गुणाः प्रधानविरोधिनि स्वकार्ये उदासीना एव भवन्ति। शाब्दव्यवहारविश्रान्तिस्थानत्वात् सर्वत्र वाक्यार्थभूतस्य तिङन्तार्थस्य प्राधान्यं भवति। तद्रीत्या प्रकृते अभिनिवेशक्रियायाः प्राधान्यमिति तत्त्वम्। तुल्यरीत्या नगरेऽभिनिवेश्य भुङ्क्ते इति वाक्यदशायां तु प्रधानभूतभुजिक्रियानिमित्तकेन अधिकरणत्वेन नगरनिष्ठम् अविनिवेशक्रियानिरूपितं कर्मत्वम् उपपन्नं भवतीति बोध्यम्।

प्रधानाशक्त्याभिधानो गुणाक्रियानिरूपितशक्तिरभिहितवत्प्रकाशत इति प्रकृतन्यायात् त्रिविधो नियमः समायाति–



२. प्रथमनियमः

(१) प्रथमो नियमः– प्रधानाक्रियानिरूपिताशक्तेः अभिहितावस्थायाम् अनभिहितापि गुणक्रियानिरूपिता शक्तिः अभिहितवत् प्रकाशते। पक्त्वौदनो भुज्यते इत्यादौ अस्य अंशस्य सञ्चारो भवति। अत्र प्रधानभुजिक्रियानिरूपिताया ओदननिष्ठकर्मत्वशक्तेः अभिधानेन अप्रधानपचिक्रियानिरूपितायाः अनभिहिताया अपि कर्मत्वशक्तेः अभिहितवत् प्रकाशो दृश्यते। एवं भुक्त्वा नगरोऽभिनिविश्यते, नगरेऽभिनिवेश्य भुङ्क्ते इत्यादिप्रयोगेषु क्रियाणां प्रधानत्वाप्रधानत्वविवक्षया अस्य नियमस्य प्रवृत्तिः परिलक्ष्यते।



३. द्वितीयनियमः

(२) द्वितीयो नियमः– गुणक्रियानिरूपितायाः शक्तेः अभिधानावस्थायामपि प्रधानक्रियानिरूपिता अनभिहिता शक्तिः अनभिहितवदेव प्रकाशते। प्रासादे आस्ते इत्यादि अत्रोदाहरणम्।अत्र साध्यत्वेन विधेयत्वात् आसिक्रिया प्रधानभूता, सदिक्रिया च अप्रधानभूता। प्रसीदत्यस्मिन्निति अधिकरणार्थे घञि प्रासादशब्दो निष्पन्नः। प्रासादशब्दे अधिकरणार्थकेन घञा सदिनिरूपिताया अधिकरणत्वशक्तेरभिधानं भवति। परन्तु सदिक्रियाया गुणत्वात् तन्निरूपिताया अधिकरणत्वशक्तेरभिधानेऽपि प्रधानभूतया आसिक्रियया निरूपिता अनभिहिता अधिकरणत्वशक्तिः अनभिहितैव अवतिष्ठते। ततश्च प्रधानक्रियानिरूपिताया अधिकरणत्वशक्तेः अनभिधानात् प्रासादशब्दात् तद्बोधिका सप्तमीविभक्तिः उत्पद्यते।



४. तृतीयनियमः

(३) तृतीयो नियमः– प्राधानप्रधानाभ्याम् उभाभ्यामपि

क्रियाभ्यां निरूपितयोः शक्त्योरनभिधाने सति गुणक्रियानिरूपितशक्तेरपि अभिधायिनी विभक्तिरुत्पद्यते। यथा ग्रामाय गन्तुमिच्छति, ग्रामं गन्तुमिच्छतीति उदाहरणम्। एकस्मिन् ग्रामपदार्थे प्रधानैषणक्रियानिरूपिता कर्मत्वशक्तिः अप्रधानगमनक्रियानिरूपिता च कर्मत्वशक्तिरिरिति शक्तिद्वयं विद्यते। प्रकृतवाक्यो उभयोरपि शक्त्योरनभिधानाद् ग्रामशब्दाद् यथा प्रधानैषणक्रियानिरूपितायाः कर्मत्वशक्तेः अभिधायिनी द्वितीयाविभक्तिर्भवति तथा अप्रधानगमनक्रियानिरूपितायाः कर्मत्वशक्तेरभिधायिन्यौ द्वितीयाचतुर्थ्यौ अपि सम्भवतः। अत एव ग्रामाय गन्तुमिच्छतीति चतुर्थ्यन्तप्रयोग उपलभ्यत इति तत्त्वम्।

**ओदनं पक्त्वा भुज्यते**–पक्त्वौदनो भुज्यते इतिवद् ओदनं पक्त्वा भुज्यत इत्यपि प्रयोगः सम्भवतीति दीक्षितप्रभृतीनामशयः। तथाहि पक्त्वा भुज्यते इत्यादौ पचिक्रियया भुजिक्रियया च कर्मणो युगपच्छाब्दोऽन्वयो न सम्भवति, एकत्र जनितान्वयबोधस्य कर्मणोऽपरत्र नैराकाङ्क्ष्यात् एकत्र विशेषणत्वेन अन्वितस्य कर्मणोऽपरत्र विशेषणत्वेन अन्वयाभावाच्च। एवञ्च सकृच्छ्रुतस्य सकृदेवान्वय इति न्यायात् पक्त्वौदनो भुज्यते इत्यत्र ओदनस्य युगपदुभयत्र शाब्दान्वयासम्भवेन अन्यतरक्रियया तदन्वयः सम्पद्यते। अपरक्रियया कर्मण आर्थः अन्वयः सिध्यतीति विशेषः। इत्थं यदा पक्त्वा भुज्यते ओदन इति प्रयोगस्तदा ओदनस्य भुजिक्रियया शाब्दोऽन्वयः। तत्र किं पक्त्वेति आकाङ्क्षायाम् अर्थतः ओदनमित्यस्य लाभात् पचिक्रियया ओदनस्य आर्थोऽन्वयः। यदा तु ओदनं पक्त्वा भुज्यत इति प्रयोगस्तदा ओदनस्य पचिक्रियया शाब्दोऽन्वयः। तत्र किं भुज्यते इत्याकाङ्क्षायाम् अर्थतः ओदनस्य लाभात् भुजिक्रियया ओदनस्य आर्थोऽन्वय इति दीक्षितप्रभृतीनां रीत्या निर्वाहो भवति।

**नागेशनिर्णयः**–''स्वादुमि णमुल्[12]'' इति सूत्रस्थभाष्यप्रामाण्यात् ओदनं पक्त्वा इति प्रयोगो न सम्भवतीति नागेशस्याशयः। समानवाक्यो तुमुन्–त्त्वा–णमुलादीनाम् अन्वयिना आख्यातेन उपस्थापितं यत्कारकं तस्मिन्नेवार्थे तुमुन्नादीनां प्रत्ययानां विधानं वक्तव्यमिति तत्र प्रथमत आशङ्कितम्। वचनाभावे कृतां कर्त्रर्थकत्वात् तुमुन्नादीनां कर्तर्यर्थे विधानं स्यात्। ततश्च पक्त्वौदनो भुज्यत इत्यादौ कर्मत्वस्य अनभिधानेन द्वितीयापत्तिः। सति वचनारम्भे क्त्वोऽपि कर्मार्थत्वेन कर्मणोऽभिधानात् न द्वितीयापत्तिरिति फलम्। अव्ययकृतां भावार्थकत्वामादाय तत्रवचनं प्रत्याख्यातम्। तदा क्तवो भावार्थकत्वेन कर्मणोऽनभिहितत्वमेवेति न दोषः। अथ ओदनं पक्त्वा भुज्यते इत्यत्रौदनस्य द्वितीयान्ततया प्रयोगो मा भूदिति वचनारम्भ आशङ्कितः। आरम्भपक्षेऽत्र ओदनस्य द्वितीयान्ततया प्रयोगाभावः। वचनप्रत्याख्यानपक्षे क्त्वो भावार्थकत्वाद् यद्यपि ओदनस्य द्वितीयान्ततया प्रयोगः सम्भवति तथापि तदनुचितम्, आरम्भप्रत्याख्यानयोः फलभेदापत्तेः। अनया रीत्या पक्त्वौदनं भुज्यत इति प्रयोगस्यानुपपत्तिः प्रतिपादिता।

आचार्यनागेशदिशा तु पक्त्वौदनो भुज्यत इत्यत्र ओदनपदार्थेन पचिभुज्योरुभयोरपि

क्रिययो: शाब्दान्वय एव भवति। उभयत्रापि शाब्दान्वये पूर्वोक्तस्य भाष्यस्य प्रामाण्यं स्वीक्रियते। पचिक्रियया ओदनस्य आर्थान्वये प्रतिपादिते ओदनं पक्त्वा भुज्यते इति प्रयोगस्य तदवस्थत्वेन वचनारम्भस्य निष्फलत्वमिति तत्त्वम्।

**क्षुधं प्रतिहन्तुं शक्यम्**-भाष्यकृता प्रयोग: कृत: क्षुदुपहन्तुं शक्यमिति, तस्मिन् प्रसङ्गे कैयटाचार्येण प्रयुक्तं क्षुधं प्रतिहन्तुं शक्यमिति। ग्रामो गन्तुम् इष्यत इत्यत्र यथा ग्रामे गमने इत्युभयत्रैव प्रधानैषणक्रियानिरूपितकर्मत्वं विद्यते तद्वत् क्षुदुपहन्तुं शक्यमित्यत्रापि प्रधानशक्नोतिक्रियानिरूपितं कर्मत्वं क्षुधि तथा उपहनने इत्युभयत्रापि विद्यते। तथा च प्रधानक्रियानिरूपितकर्मत्वस्य अभिधानात् तत्समानाधिकरणस्य अनभिहितस्यापि अप्रधानोपहननक्रियानिरूपितकर्मत्वस्य अभिहितवत्प्रकाश: सम्पद्यते। तत: क्षुदुपहन्तुं शक्यमिति प्रयोग: सिध्यति।

एतदुपरि कैयटाचार्येण क्षुधं शक्यमिति प्रयोगोऽपि सम्भवतीति आग्रह: प्रकाशित:। तथाहि तिङन्तवाच्यक्रियानिरूपितशक्तेरेव वस्तुस्वभावमाहात्म्येन प्राधान्यं भवति, तादृशशक्तेरेव स्वसमानाधिकरणेतरशक्त्याभिभावकत्वमिति पूर्वं प्रतिपादितम्। अथ क्षुधं प्रतिहन्तुं शक्यमित्यत्र शक्यामित्यस्य नाख्यातत्वमपि तु नामत्वमेव। नामत्वेन च तदुपस्थापितशक्नोतिक्रियाया गुणत्वम्, गुणत्वाच्च तन्निरूपितकर्मत्वशक्ते: स्वसमानाधिकरणेतरशक्त्यभिभवे सामर्थ्याभाव इति व्याख्यातम्। ततश्च शक्नोतिक्रियानिरूपितस्य क्षुन्निष्ठकर्मत्वस्य अभिधानेऽपि शक्नोतिक्रियाया गुणत्वेन प्रतिहननक्रियानिरूपिता क्षुन्निष्ठा कर्मत्वशक्ति: अनभिहितवदेव प्रकाशते। अनभिहिते कर्मणि द्वितीयया क्षुधं प्रतिहन्तुं शक्यमिति प्रयोग: सिध्यतीति कैयटानुयायिनाम् आशय:।

परन्तु नैतद्युक्तम्, नामत्वेऽपि शक्यमिति पदोपस्थाप्याया: शक्नोतिक्रियाया: प्राधान्यस्य तदवस्थत्वात्। नमन्ति आख्यातार्थं प्रति विशेषणत्वेनान्वेतीति व्युत्पत्त्या नामन्-शब्दस्य निष्पत्ते: आख्यातार्थं प्रति नामार्थस्य विशेषणत्वमिति तात्पर्यं लभ्यते। तथापि शाब्दबोधौचित्यमादाय नामार्थयो: परस्परं प्रधानाप्रधानभाव: सम्भवत्येव, तत्र प्रधानाप्रधानभावस्य अभाव इति व्याख्यानम् अयुक्तम्। एवञ्च शक्नोतिक्रियाया: प्राधान्येन प्रतिहननक्रियायाश्च अप्राधान्येन निर्वाहे क्षुधं प्रतिहन्तुं शक्यमिति प्रयोगस्य सततम् अनौचित्यमिति ज्ञायते। प्रकृतवाक्यो क्रिययो: प्रधानत्वाप्रधानत्वनिर्णये च शाब्दबोधौचित्यमेव मूलमिति बोध्यम्। अपि च, नामोपस्थाप्यत्वमात्रेण यदि क्रियाया गुणत्वं तर्हि ग्रामं ग्रामाय वा गन्तुं शक्यमिति प्रयोगापत्ति:। अत्र शक्नोतिक्रियाया अप्राधान्यात् तन्निरूपितस्य ग्रामनिष्ठस्य कर्मत्वस्य अभिधानेऽपि गमनक्रियानिरूपितस्य अनभिहितस्य कर्मत्वस्य तदवस्थत्वात् ''गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि[13]'' इत्यनभिहिते कर्मणि द्वितीयाचतुर्थ्यापत्ति:। एवमेव क्षुदुपहन्तुं शक्यमिति भाष्यप्रयोगानापत्तिरपि प्रकृते अनुसन्धेया। अस्मिन् भाष्यप्रयोगे शक्नोतिक्रियाया अप्राधान्यात् तन्निरूपितस्य क्षुन्निष्ठस्य कर्मत्वस्य

अभिधानेऽपि उपहननक्रियानिरूपितस्य कर्मत्वस्य तु अनभिहितत्वमिति अभिहिते कर्मणि प्रथमाया अनापत्तिरिति भावः।

**विमर्शः**-प्रकृतप्रबन्धे चतुर्षु स्थलेषु मतविरोधो दृश्यते। तानि स्थलान्यादाय सम्प्रति विमर्शः प्रस्तूयते।

(१) प्रथमतः क्त्वा-तुमुनोः कोऽर्थ इति विषये भाष्यकार-वार्तिककारयोः मतविरोधो दृश्यते। "कर्तरि कृत्[14]" इति सूत्रप्रामाण्यात् क्त्वः तुमुनश्च कर्त्रर्थकत्वामिति वार्तिककारस्य सिद्धान्तः। अथ कृतां यदि कर्त्रर्थकत्वं तर्हि "तुमर्थे सेसेनसे[15]..." इत्यादिसूत्रेण विधीयमानानां से-प्रभृतीनां कर्त्रर्थकत्वं स्वतःसिद्धम्। तथापि तत्र कृतं तुमर्थग्रहणं व्यर्थमिति तद्व्यर्थीभूय तुमुनः विलक्षणार्थकत्वं कर्त्रर्थकत्वाभावञ्च ज्ञापयति। वार्तिककारमते "आ च तुमुनः प्रत्ययाः समानाधिकरणे[16]" इति वचनमारब्धव्यमिति गौरवम्। भाष्यकारमते तु अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति नियमेन तुमुन्नादीनां भावार्थकत्वमादाय निर्वाहः सम्भवतीति नात्र वचनस्य आवश्यकतेति लाघवमेव।

(२) पक्त्वौदनो भुज्यत इति प्रयोगोपपत्तौ समाधानप्रसङ्गे मतविरोधो दृश्यते। प्रधानशक्त्यभिधाने गुणक्रियानिरूपितशक्तिरभिहितवत्प्रकाशत इति न्यायेन अप्रधानपचिक्रियानिरूपितकर्मत्वाशक्तिः अनभिहितापि अभिहितवत् प्रकाशत इति प्रथमं समाधानम्। वाक्ये पाकक्रियायाम् ओदनस्य कर्मत्वेन अन्वयासम्भवः, प्रथमान्तपदबोध्यस्य ओदनस्य पक्त्वेत्यनेन सह सम्बन्धानर्हत्वात्। केवलया भुजिक्रिययैव ओदनस्य सम्बन्धः। भुजिक्रियानिरूपिता ओदननिष्ठा कर्मत्वशक्तिश्च लकारेण अभिहितेति प्रथमैव इति द्वितीयं समाधानम्। अनयोः प्रथमसमाधानस्यैव युक्तत्वमिति भाति। द्वितीयमार्गानुसारम् अत्र पाकक्रियया साकमोदनस्य एकवाक्योपात्तत्वरूपसामर्थ्यलभ्यः सम्बन्धो जायते। स च सम्बन्धः पाकभोजनयोः गुणप्रधानभावे सत्येव लभ्यते नान्यथा। एवमत्र एकवाक्योपात्तत्वरूपं सामर्थ्यं तथा क्रिययोः गुणप्रधानभाव इत्युभयोरपि सङ्ग्रहाद् गौरवमिति आशयः।

(३) पक्त्वौदनं भुज्यत इति प्रयोगोपपत्तौ प्राचीननवीनयोः मतविरोधो दृश्यते। पचिक्रियया भुजिक्रियया च कर्मणो युगपच्छाब्दः अन्वयो न सम्भवति, एकत्र जनितान्वयबोधस्य कर्मणोऽपरत्र नैराकाङ्क्ष्यात्। एवञ्च यदा भुजिक्रियया ओदनस्य शाब्दोऽन्वयस्तदा किं पक्त्वेति आकाङ्क्षायाम् अर्थतः ओदनमित्यस्य लाभात् पचिक्रियया ओदनस्य आर्थोऽन्वयः। अस्यां स्थितौ पक्त्वौदनो भुज्यत इति प्रयोगः। यदा तु ओदनस्य पचिक्रियया शाब्दोऽन्वयस्तदा किं भुज्यते इत्याकाङ्क्षायाम् अर्थतः ओदनस्य लाभात् भुजिक्रियया ओदनस्य आर्थोऽन्वयः अस्यामवस्थायां पक्त्वौदनं भुज्यत इति प्रयोगः इति प्रचीनानां निर्वाहः। '"स्वादुमि णमुल्[17]" इति सूत्रस्थभाष्यप्रामाण्यात् ओदनं पक्त्वा भुज्यत इति प्रयोगो न सम्भवतीति नवीनानां निर्णयः। "आ च तुमुनः प्रत्ययाः समानाधिकरणे[18]" इति वचनारम्भपक्षे पक्त्वौदनं भुज्यत इति प्रयोगाभावः सिद्धः,

वचनप्रत्याख्यानपक्षेऽपि अस्य प्रयोगस्याभाव एवोचित इति पक्त्वौदनं भुज्यत इति प्रयोगस्य सततम् अभाव इति नवीनानां सिद्धान्तः। एतद्भाष्यप्रामाण्यादेव पचिक्रियया भुजिक्रियया च ओदनस्य युगपच्छाब्दोऽन्वयः सम्भवतीति बोध्यम्। अनया रीत्या पक्त्वौदनो भुज्यत इति प्रयोगस्य साधुत्वम्, पक्त्वौदनं भुज्यत इति प्रयोगस्य च असाधुत्वमिति फलति।

(४) तिङन्तावाच्यक्रियानिरूपितशक्तेरेव वस्तुस्वभावमाहात्म्येन प्राधान्यं भवति,अतः क्षुत् प्रतिहन्तुं शक्यत इत्येव प्रयोगः। यदा तु शक्यमिति नाम्नः प्रयोगस्तदा क्षुत्प्रतिहन्तुं शक्यम्, क्षुधं प्रतिहन्तुं शक्यमिति उभयविध एव प्रयोगः सिध्यतीति कैयटाचार्यस्य सिद्धान्तः। परन्तु नैतद् युक्तम्, क्षुदुपहन्तुं शक्यमिति भाष्यप्रयोगस्य अनापत्तेः। नाम्ना उपस्थाप्यात्वाद् यद्यपि शक्नोतिक्रियायाः सर्वतः प्राधान्यं न सम्भवति तथापि शाब्दबोधौचित्यात् नामोपस्थाप्ययोः क्रिययोः गुणप्रधानभावः सम्भवत्येवेति तत्त्वम्।

**उपसंहार**–प्रकृतप्रबन्धे क्त्वान्तेन तुमुन्नन्तेन च उपस्थाप्या या क्रिया तत्र सम्बन्धित्वेन भासमानस्य कर्मणः कथम् अभिधानानभिधानव्यवस्था भवतीति प्रकृतप्रबन्धस्य लक्ष्यविषयः। तत्र विचारावसरे प्राप्तानि सर्वाण्यपि संशयस्थलानि विस्तारेण विमृष्टानि सन्ति। अत्र क्त्वा-तुमुनोः विषये यथा विचारः प्रस्तुतस्तथा णमुलो विषयेऽपि आलोचनं सम्भवति। वस्तुतस्तु प्रकृते क्त्वा तुमुन् च अव्ययकृतामुपलक्षणमिति बोध्यम्, विस्तारभयात् क्त्वा-तुमुनोरेव संक्षिप्तो विमर्शः अत्र उपस्थाप्यते। अत्र प्रबन्धे विचारबिन्दूनां युक्तत्वायुक्तत्वे विद्वांस एव प्रमाणमिति विनिवेद्य अत्रैव विरम्यत इति शम्।

**संकेतपञ्जिः**

पा.सू. = *पाणिनीयसूत्रम्*।
म.भा. = *महाभाष्यम्*।
वा.प. = *वाक्यपदीयम्*।
सम्पा. = सम्पादकः।

**उल्लेखपञ्जिः**

1 पा.सू. ०३/०३/१०।
2 पा.सू. ०३/०४/६७।
3 पा.सू. ०३/०४/०९।
4 पा.सू. ०३/०३/२१।
5 पा.सू. ०३/०३/६७।
6 तदेव।
7 पा.सू. ०३/०३/६७।

8 म.भा. ''स्वादुमि णमुल्''।
9 वा.प. - ०३.०७.८१।
10 वा.प. - ०३.०७.८१।
11 *निरुक्तम्* - १.०१।
12 पा.सू. ०३/०४/२६।
13 पा.सू. ०३/०२/१२।
14 पा.सू. ०३/०४/६७।
15 पा.सू. ०३/०४/०९।
16 म. भा. ''स्वदुमि णमुल्''।
17 पा.सू. ०३/०४/६७।
18 म.भा. ''स्वादुमि णमुल्''।

**❑ परिशीलितग्रन्थपङ्क्तिः**


कौण्डभट्टः। *बैयाकरणभूषणसारः* (प्रभा-दर्पण-व्याख्याद्वयोपेतः)। वाराणसीः चौखम्भा संस्कृत संस्थान, २०७८ वि. सं. पुनर्मुद्रणम्।

कौण्डभट्टः। *बैयाकरणभूषणसारः* (काशिका-दर्पण-व्याख्याद्वयोपेतः)। वाराणसीः चौखम्बा सुरभारती प्रकाशन, २००९ ई.

गदाधरभट्टाचार्यः। *व्युत्पत्तिवादः* (विद्वन्मनोरमा-व्याख्याया सहितः)। सम्पा. आचार्यः हरेकृष्णशतपथी। तिरुपतिः Institut francais de Pondichery, राष्ट्रियसंस्कृतविद्यापीठम्,२०१२ ई.

महर्षिपतञ्जलिः। *महाभाष्यम्* (तृतीयां खण्डम्, प्रदीपोद्योतसहितम्)। सम्पा. श्रीभार्गवशास्त्री। दिल्लीः चौखम्बा संस्कृत प्रतिष्ठान, २०१४ ई. पुनर्मुद्रितसंस्करणम्।

भट्टोजिदीक्षितः। *प्रौढमनोरमा* (शब्दरत्नसहिता)। सम्पा. पण्डित-गोपालशास्त्री नेने। वाराणसीः, चौखम्बा संस्कृत भवन, २०७५ वि.सं. प्रथमसंस्करणम्।

भावनन्दसिद्धान्तवागीशः। *कारकचक्रम्*। वाराणसीः चौखम्बा-संस्कृत-सीरिज-आफिस, १९४१ ई.।

यास्काचार्यः। *निरुक्तम्*। सम्पा. प्रो. उमाशङ्करशर्मा (ऋषि)। वाराणसीः चौखम्बा विद्याभवन, १९६१ ई.।

लौगाक्षिभास्करः। *अर्थसङ्ग्रहः* (अर्थालोक-संस्कृत-टीकासंवलितः)। वाराणसीः चौखम्भा पब्लिशर्स, २०१७ ई.।

# List of Contributors

## Vol. XXV, 2019-2020

| | | |
|---|---|---|
| 1. | **Gopalchandra Misra** | Former Vice Chancellor, University of Gour Banga Former Dean, Faculty of Arts, RBU Former Professor & Head, Department of Sanskrit, RBU |
| 2. | **Sanjit Kumar Sadhukhan** | Former Professor & Head, Department of Sanskrit, RBU |
| 3. | **Subrata Mondal** | Assistant Professor Department of Sanskrit, RBU |
| 4. | **Vivek Karmakar** | Assistant Professor Department of Sanskrit Scottish Church College, Kolkata |
| 5. | **Subhasree Dutta** | Assistant Teacher Deshapriya Balika Vidyalaya |
| 6. | **Mritujunjay Sen** | Research Scholar, Department of Sanskrit Cooch Behar Panchanan Barma University |
| 7. | **Sourav Dutta** | Research Scholar, Department of Sanskrit, R.B.U. |
| 8. | **Sumanta Patra** | Research Scholar, Ramakrishna Mission Vidyamandira, Belurmath |
| 9. | **Pralay Nandi** | Research Scholar, Ramakrishna Mission Vivekananda Siksha Sodh Sansthan, Belurmath |